SUṢAMĀ : Multidisciplinary Research Journal ISSN: 3107-4529
Vol. 1, Issue-1, (Jan-Mar) 2025

# शब्दार्थरत्नदिशा पदतत्त्वविमर्शः

(śabdārtharatnadiśā padatattvavimarśaḥ)

**Dr. Pintu Raul**
State Aided College Teacher,
Dept. of Sanskrit, Sitananda College
Purba Medinipur, West Bengal, India.
E-mail: raulpintu@gmail.com

**Abstract:** Based on the Padakanda of Taranath Tarkavachaspati's *Shabdartharatna*, this research paper discusses the nature of words (*padatattva*). The *Shabdartharatna* has two chapters: the Vakyakanda and the Padakanda. In this paper, I have first demonstrated the connection between the Padakanda and the Vakyakanda, then discussed topics such as the origin of letters, the nature of words, the types of words, a proper discussion of their types, and the opinions of scholars on the distinctions among words. Furthermore, a significant discussion has been included on the topic of *karmapravachaniya* as per Panini's *sutras*, the question of whether *nipatas* (indeclinables) and *upasargas* (prefixes) are denotative (*dyotaka*) or significative (*vachaka*), the flaws and arguments in the significativeness of *nipatas*, and the views of Bhartrhari on whether *nipatas* and *upasargas* are denotative or significative.

**Keywords:** Karmapravacanīyam, Padam, Nipātaḥ, Upasargāḥ.

**सारांशः**— तारानाथतर्कवाचस्पतेः शब्दार्थरत्नस्य पदकाण्डम् अवलम्व्य पदतत्त्वम् आलोच्यते। शब्दार्थरत्ने द्वे काण्डे भवतः— वाक्यकाण्डं पदकाण्डञ्चेति। अस्मिन् सन्दर्भे वाक्यकाण्डेन सह पदकाण्डस्य सङ्गतिः कथम् इति प्रदर्शनपूर्वकं वर्णानामुत्पत्तिः, पदस्य स्वरूपं, पदस्य भेदाः, तेषां भेदानां यथोपयुक्तमालोचनं, पदभेदविषये पण्डितानां मतम् इति विषयाः मया उपस्थापिताः। अपि च प्रसङ्गात् पाणिनीयसूत्रैः कर्मप्रवचनीयविषयस्य विशिष्टम् आलोचनं, निपातोपसर्गाः द्योतकाः वाचकाः वा इति विषयः, निपातानां वाचकत्वे दोषाः युक्तयश्च, भर्त्तृहरिमते निपातोपसर्गाः द्योतकाः वाचकाः वा इत्यादिभिः विषयैः सह तत्तद्विषयेषु निष्कर्षोऽर्थः अपि मया समुपस्थापितः।

**कूटशब्दाः** — कर्मप्रवचनीयम्, पदम्, निपातः, उपसर्गाः।

**वाक्यकाण्डेन सह पदकाण्डस्य सङ्गतिविवेचनम्—**

श्रीमता तारानाथ-तर्कवाचस्पतिना प्रणीतः शब्दार्थरत्नमित्याख्यग्रन्थः। अस्मिन् ग्रन्थे द्वे काण्डे विद्येते वाक्यकाण्डपदकाण्डभेदात्। वाक्यकाण्डेऽस्मिन् आदौ व्याकरणं नाम

शब्दानुशासनम् इत्युक्तमस्ति। ततः शब्दानां साधुत्वं, "शब्दो हि नाम पृथिव्यादिभूतचतुष्टयक्रियाजन्योऽवकाशोत्पन्नो द्रव्याश्रितो गुणविशेषः"[1] इत्येवं प्रतिपादितम्। अनन्तरं वर्णोत्पत्तिप्रकारप्रदर्शनेन सह "वर्णसमुदायात्मकं सुप्तिङन्तरूपं पदं पदकदम्बात्मकञ्च परस्परसाकाङ्क्षं क्रियाप्रधानं वाक्यम्"[2] इति सिद्धान्तरूपं वाक्यलक्षणम् उपस्थापितमस्ति। अस्मिन् वाक्यलक्षणे "पदकदम्बात्मकम्"[3] इत्युक्ते सति तस्य पदस्य किं स्वरूपम्? तस्य च पदस्य कति भेदाः? इत्यादयः प्रश्नाः समुदिताः। एतेषां प्रश्नानां समाधानाय पदकाण्डमिदं प्रारभ्यते तर्कवाचस्पतिना।

**वर्णोत्पत्तिविवेचनम्—**

कथञ्च तेषां वर्ण-पद-वाक्यानां पारस्परिकसम्बन्धः तदधुना विविच्यते। शब्दनित्यत्ववादिनः मीमांसकाः ब्रुवते– अर्कः, अश्वः इत्यादीनां पदानां भेदेऽपि तेषाम् अकारादिवर्णानाम् एकत्वन्तु तिष्ठति एव, स एव अयम् अकारः इति प्रतीतेः। तदुक्तं महाभाष्ये– "अइउण्"[4] इति सूत्रव्याख्यावसरे "एकत्वादकारस्य सिद्धम्"[5] । वर्णाः एव पदं वाक्यञ्च इत्यतः वर्णानाम् एकत्वात् तद्रूपाणां वाक्यानाञ्च एकत्वं सिद्धम्। तदुक्तं हरिणा–

"पदभेदेऽपि वर्णानामेकत्वं न निवर्तते।
वाक्येषु पदमेकं च भिन्नेष्वप्युपलभ्यते"॥[6] इति।
"न वर्णव्यतिरेकेण पदमन्यच्च विद्यते।
वाक्यं वर्णपदाभ्यां च व्यतिरिक्तं न किञ्चन"॥[7] इति।

एतेन मीमांसकनये वर्णपदयोः अभेदः सम्बन्धः अवबोध्यते। किन्तु एतन्मतं न सहन्ते वैयाकरणाः। एतेषां नये तु ऋकारौकारादिषु वर्णेषु प्रतीयमानाः अपि अवयवसदृशाः रेफ-अकार-उकाराः न विद्यन्ते। एवं पदभेदेऽपि प्रतीयमानाः वर्णाः अपि न विद्यन्ते। एवं वाक्यात् पदानामपि पृथक् सत्ता नास्ति। एवञ्च वाक्ये प्रतीयमानानि पदानि, पदे प्रतीयमानाः वर्णाश्च न सन्ति। यद्यपि निरवयवं वाक्यं सत्यं, तथापि व्याकरणशास्त्रे पारमार्थिकदृष्ट्या एकत्वानेकत्वव्यवहारः सम्भवति। यथा महाभाष्यकारः सरूपसूत्रभाष्ये प्राह– "एकश्च शब्दः बह्वर्थोऽक्षाः पादाः माषा"[8] इति। एवं वर्णास्तित्वपक्षे वाक्यात्मिका वाक् पदेषु विभज्यते, पदं च वर्णेषु प्रविभज्यते। अतः वर्णानाम् उत्पत्तिः आदौ निरूप्यते। सोदीर्णः वायुः मूर्ध्नि अभिहतः आस्ये आपद्य वर्णान् जनयति। तेषां वर्णानां पञ्चधा विभागः कृतः वर्तते स्वर-काल-स्थान-प्रयन्त-अनुप्रदानभेदात्। पाणिनीयशिक्षायां वर्णाः त्रिषष्टिः चतुःषष्टिः वा इति शम्भुमते दर्शिताः। तथोक्तं–

"स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः।
यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः"॥[9] इति।
"अनुस्वारो विसर्गश्च ꣹कꣲपौ चापि पराश्रितौ।
दुःस्पृष्टश्चेति विज्ञेयो ऌकारः प्लुत एव च"॥[10] इति।

अयमर्थः ह्रस्वदीर्घप्लुतभेदात् अ इ उ ऋ इत्येतेषां द्वादश भेदाः सन्ति– अ, आ, आ३, इ, ई, ई३, उ, ऊ, ऊ३, ऋ, ॠ, ॠ३। लृकारस्य एकः भेदः। ह्रस्वाभावात् दीर्घप्लुतभेदात् ए ऐ ओ औ इत्येतेषाम् अष्टौ भेदाः सन्ति– ए, ए३, ओ, ओ३, ऐ, ऐ३, औ, औ३। एतेषां वर्णानां सम्मेलनेन एकविंशतिः स्वरवर्णाः सञ्जाताः। स्पर्शवर्णास्तु पञ्चविंशतिः कादयो मावसानाः– क्, ख्, ग्, घ्, ङ्, च्, छ्, ज्, झ्, ञ्, ट्, ठ्, ड्, ढ्, ण्, त्, थ्, द्, ध्, न्, प्, फ्, ब्, भ्, म्। यादयो हान्ता अष्टौ वर्णाः सन्ति– य्, र्, ल्, व्, श्, ष्, स्, ह्। यमाः चत्वारः वर्णाः– १. अघोषाल्पप्राणाः (क्, च्, ट्, त्, प्), २. अघोषमहाप्राणाः (ख्, छ्, ठ्, थ्, फ्), ३. सघोषाल्पप्राणाः (ग्, ज्, ड्, द्, ब्), ४. सघोषमहाप्राणाः (घ्, झ्, ध्, ढ्, भ्)। "वर्गेष्वाद्यानां चतुर्णां पञ्चमे परे मध्ये यमो नाम पूर्वसदृशो वर्णः प्रातिशाख्ये प्रसिद्धः। पलिक्क्नी, चख्ख्नतुः, अग्ग्निः, घ्घ्नन्तीत्यत्र क्रमेण कखगघेभ्यः परे तत्सदृशाः एव यमाः"[11]। अनुस्वारादयः चत्वारः वर्णाः। लृकारस्य स्वरत्वयलत्वोभयधर्मसमावेशात् द्विविधे भेदे सति त्रिषष्टिः वर्णाः, एवञ्च लृकारस्य प्लुतत्वे सति चतुःषष्टिः वर्णाः सम्भवन्ति।

एतेषां वर्णानाम् उत्पत्तिस्थानानि आभ्यन्तरबाह्यप्रयत्नभेदाः च वर्तन्ते। तच्च समीचीनतया वर्ण्यते कौमुदीकारेण– "अकुहविसर्जनीयानां कण्ठः"। अत्र 'अ' इत्यस्य अष्टादश भेदाः एव गृह्यन्ते। कु इति कादिपञ्चकात्मकः कवर्गः। विसर्जनीयशब्दः विसर्गपर्यायवाची। अकारस्य, कवर्गस्य, हकारस्य विसर्जनीयस्य च उच्चारणस्य स्थानं कण्ठ इत्यर्थः। "इचुयशानां तालु"। तालु नाम काकुदम्। अत्र 'इ' इत्यस्य अष्टादश भेदाः ग्राह्याः। 'चु' इति चवर्गः। इकारस्य, चवर्गस्य, यकारशकारयोः चोच्चारणस्य स्थानं तालु इत्यर्थः। "ऋटुरषाणां मूर्धा"। ऋ इत्यस्य अष्टादश भेदाः गृह्यन्ते। 'ऋ' इत्यस्य 'आ' इति प्रथमैकवचनान्तम्। टु इति टवर्गः। ऋकारस्य, टवर्गस्य, रेफषकारयोः चोच्चारणस्य स्थानं मूर्धा इत्यर्थः। "लृतुलसानां दन्ताः"। लृकारस्य द्वादश भेदाः ग्राह्याः। लृ इत्यस्यापि आ इति प्रथमैकवचनान्तम्। तु इति तवर्गः। अत्र दन्तशब्देन दन्तमूलप्रदेशः बोध्यः। लृकारस्य, तवर्गस्य, लकारसकारयोः चोच्चारणस्य स्थानं दन्ताः इत्यर्थः। "उपूपध्मानीयानामोष्ठौ"। उ इत्यस्य अष्टादश भेदाः ग्राह्याः। पु इति पवर्गः। उकारस्य पवर्गस्य उपध्मानीयस्य चोच्चारणस्य स्थानम् ओष्ठौ इत्यर्थः। "ञमङणनानां नासिका च"। ञमङणनानाम् उच्चारणं स्थानं नासिका इत्यर्थः। चकारेण अत्र स्वस्ववर्गीयस्थानसमुच्चयः अस्ति। "एदैतोः कण्ठतालु"। एच्च ऐच्च एदैतौ। असंदेहार्थं तपरकरणं, न तु "तपरस्तत्कालस्य"[12] इत्यनेन सूत्रेण तत्कालमात्रग्रहणार्थम्। अतः अत्र प्लुतयोः अपि संग्रहः भवति। "औदौतोः कण्ठोष्ठम्"। ओच्च औच्च ओदौतौ। अत्रापि तपरकरणम् असंदेहार्थमेव। वकारस्य दन्तोष्ठं, जिह्वामूलीयस्य जिह्वामूलं, नासिकानुस्वारस्य। इति वर्णानाम् उच्चारणस्थनानि वर्तन्ते। एतैः स्थानैः वर्णाः उच्चार्यन्ते।

वर्णानां प्रयत्नभेदाः अपि वर्तन्ते। प्रकृष्टो यत्नः प्रयत्नः। स च प्रयत्नः द्विविधः आभ्यन्तरबाह्यभेदात्। वर्णोच्चारणात् पूर्वं मुखाभ्यन्तरे यः यत्नः (चेष्टा) सः आभ्यन्तरप्रयत्नः।

आभ्यन्तरप्रयत्नस्तु चतुर्विधः स्पृष्ट-ईषत्स्पृष्ट-विवृत-संवृतभेदात् दीक्षितमतेन। स्पर्शवर्णानाम् आभ्यन्तरप्रयत्नः स्पृष्टम्। कवर्णात् मवर्णपर्यन्तं सर्वे वर्णाः स्पर्शवर्णाः। अन्तःस्थवर्णानाम् आभ्यन्तरप्रयत्नः ईषत्स्पृष्टम्। य्, र्, ल्, व् इति चत्वारः वर्णाः अन्तःस्थवर्णाः। स्वरवर्णाम् ऊष्मवर्णानां च आभ्यन्तरप्रयत्नः विवृतम्। स्वरास्तु अ, इ, उ, ऋ, ऌ, ए, ओ, ऐ, औ इति वर्णाः। श, ष, स, ह् इति चत्वारः वर्णाः ऊष्मवर्णाः इति उच्यन्ते। ह्रस्वस्य अवर्णस्य प्रयोगे आभ्यन्तरप्रयत्नः संवृतम्। यथा– "रामः, कृष्णः इत्यादिशब्दानां प्रयोगे क्रियमाणे एव ह्रस्वस्य अवर्णस्य संवृतत्वम्"[13]। शास्त्रीयकार्यप्रवृत्तिसमये ह्रस्वस्य अवर्णस्य आभ्यन्तरप्रयत्नः विवृतम्। "अ अ" (पा. सू. ८-४-६८) इति सूत्रे भट्टोजिदीक्षित आह– "विवृतम् अनूद्य संवृतोऽनेन विधीयते"[14] इति। लुप्तषष्ठीकस्य प्रथमपदस्य अ-इत्यस्य आभ्यन्तरप्रयत्नः विवृतम्। लुप्तप्रथमाकस्य द्वितीयपदस्य अ-इत्यस्य आभ्यन्तरप्रयत्नः संवृतम्। शिक्षावचनसिद्धं स्वाभाविकं संवृतत्वम् अनूद्य वर्णसमाम्नाये विवृतत्वेन उपदिष्टस्य अवर्णस्य संवृतः अवर्णः भवति।

वर्णस्य मुखात् बहिरागमनसमये या चेष्टा भवति सः तु बाह्यप्रयत्नः इति कथ्यते। बाह्यप्रयत्नः एकादशविधः। तथा हि– विवारः, संवारः, श्वासः, नादः, घोषः, अघोषः, अल्पप्राणः, महाप्राणः, उदात्तः, अनुदात्तः, स्वरितः चेति। वर्णोच्चारणकाले मुखोद्घाटनं विवारः। वर्णानामुच्चारणकाले मुखस्य संकोचनं (अल्पमुद्घाटनम्) संवारः। येषां वर्णानामुच्चारणकाले मुखात् अधिकवायुः निर्गच्छति तत्र श्वासप्रयत्नः कथ्यते। मधुरः ध्वनिः नादः। वर्णोच्चारणकाले गुञ्जनं घोषः। गुञ्जनस्य अभावः अघोषः। वर्णोच्चारणकाले प्राणवायोः अल्पप्रयोगः अल्पप्राणः। वर्णोच्चारणकाले प्राणवायोः अधिकप्रयोगः महाप्राणः। ताल्वादिषु समभागेषु स्थानेषु ऊर्ध्वभागैः उच्चारणम् उदात्तः, निम्नभागैः उच्चारणम् अनुदात्तः, एवञ्च समभागैः उच्चारणं स्वरितः। केषां वर्णानां के बाह्यप्रयत्नाः भवन्तीति विषये भट्टोजिदीक्षितेन श्लोकद्वयम् उपस्थापितम्–

"खयां यमाः खयः ᳲकᳲपौ विसर्गः शर एव च।
एते श्वासानुप्रदाना अघोषाश्च विवृण्वते॥
कण्ठमन्ये तु घोषाः स्युः संवृता नादभागिनः।
अयुग्मा वर्गयमगा यणश्चाल्पासवः स्मृताः"॥[15] इति।

खयः अर्थात् वर्गाणां प्रथमद्वितीयवर्णाः, तथा तेषामेव यमवर्णाः, जिह्वामूलीयोपध्मानीयौ, विसर्गः, शषसाः इत्येतेषां बाह्यप्रयत्नः विवारः, श्वासः अघोषश्च भवति। वर्गाणां तृतीयचतुर्थपञ्चमवर्णाः, तृतीयचतुर्थयमौ, हयवरलाः इत्येतेषां बाह्यप्रयत्नः संवारः, नादः घोषश्च भवति। वर्गाणां प्रथमतृतीयपञ्चमवर्णाः, प्रथमतृतीययमौ, अन्तःस्थवर्णाः (य्, र्, ल्, व्), स्वरवर्णाश्च अल्पप्राणाः। वर्गाणां द्वितीयचतुर्थवर्णाः शल्-प्रत्याहारस्थवर्णाश्च महाप्राणाः भवन्ति। स्वरवर्णास्तु उदात्तानुदात्तस्वरिताः।

**पदस्वरूपविवेचनम्—**

सम्प्रति पदस्वरूपम् आलोच्यते–

"न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते"॥[16] इति।

अतः ज्ञानस्य अर्थबोधस्य वा कारणं शब्दः पदं वा। परन्तु तस्य पदस्य किं लक्षणं किं स्वरूपं वा इति आशङ्का जायते। तदा उच्यते "पद्यते ज्ञायते अनेन इति व्युत्पत्त्या पदशब्दः अर्थावबोधकशब्दमात्रपरः बोध्यः"[17] इति। तेन "अर्थबोधकः प्रयोगार्हवर्णसमुदायः पदम्"[18] इति। पुनः पदस्य पारिभाषिकलक्षणं विद्यते "सुप्तिङन्तं पदम्" (पा. सू. १-४-१४) इति। न्यायमते तु "शक्तं पदम्"[19] इत्युच्यते। साहित्यकाराणां मते "वर्णाः पदम्"[20] इति। शब्दकौस्तुभग्रन्थानुसारं पदस्य स्थितिः एवमस्ति यत्, आधारात् आधेयः भिन्नः अस्ति। यथा– कपाले घटोऽस्ति इत्यत्र कपालः आधारः किञ्च घटः आधेयः, अत्र तु कपालात् घटः भिन्नः अस्त्येव, तथैव "वर्णमालायां पदम्"[21] इति प्रतीतेः वर्णमालायाः अधिकरणत्वमस्ति किञ्च पदस्य आधेयत्वम् अस्ति। अतः वर्णसमूहात् पदं भिन्नमेव। पदविषये वाक्यपदीयकारस्य आशयोऽस्ति "प्रकृतिप्रत्ययसमुदायः[22] पदम्" इति। प्रकृतिप्रत्ययसमुदायः पदम् इति श्रवणात् परं प्रकृतिप्रत्यययोः स्वरूपमपि ज्ञातव्यमस्ति। प्रकृतिः इत्युक्ते "अर्थावबोधहेतुः प्रत्ययविधानावधिभूतः शब्दविशेषः"[23] इति। अवधित्वं नाम पूर्वापरत्वरूपं बोध्यम्। तेन अर्थः जायते– प्रकृतिः सा स्यात्, या अर्थबोधस्य हेतुः, या च प्रत्ययात् पूर्वं प्रयुज्यते किञ्च शब्दविशेषः अपि। प्रकृतिं लक्षयितुं श्रीमज्जगदीशतर्कालङ्कारः आह–

"स्वेतरार्थानवच्छिन्नयत्स्वार्थस्यावबोधने।
यच्छब्दनिश्चयो हेतुः प्रकृतिः सा तदर्थिका"॥[24] इति।

अर्थात् यच्छब्दस्य निश्चयो स्वभिन्नार्थासम्बद्धस्य स्वकीयार्थस्य बोधं प्रति कारणं स शब्दः तदर्थे प्रकृतिः। यथा पटमित्यादौ पटादिशब्दः सुबर्थकर्मकत्वाद्यंशे स्वार्थस्य वस्त्रादेः बोधजनकः। एवञ्च भवतीत्यादौ भूप्रभृतिधातुः कर्तृत्वादौ स्वार्थस्य जननादेर्बोधकः इत्यर्थः। तथा चोक्तं शब्दशक्तिप्रकाशिकायां "स्वेतरशब्दार्थविशेषितस्य यादृशस्वार्थस्य अन्वयबोधं प्रति स्वाव्यवहितोत्तरत्वसंसर्गेण यादृशशब्दवत्तायाः निश्चय एव हेतुस्तादृशशब्दस्तथाविधार्थे प्रकृतिः। पटभूप्रभृतयो हि शब्दाः स्वोत्तरविभक्त्याद्यंशे निश्चिता एव स्वोपस्थाप्यस्य वसनजननादेरन्वयः प्रत्ययार्थे कर्मत्वकर्तृत्वादौ बोधयन्ति न त्वन्यथा"[25] इति।

प्रत्ययः इत्युक्ते "प्रकृतिमवधीकृत्य विधीयमानः स्वार्थबोधकः शब्दविशेषः"[26] इति। अर्थात् यः प्रकृतिम् अवधीकृत्य विधीयमानः, आत्मनः अर्थस्य बोधकः किञ्च शब्दविशेषोऽपि सः प्रत्ययः। प्रत्ययं लक्षयितुम् आचार्यजगदीशेन प्रोक्तं–

"इतरार्थानवच्छिन्ने स्वार्थे यो बोधनाक्षमः।
तिङर्थस्य निभाद्यन्यः स वा प्रत्यय उच्यते"॥[27] इति।

अर्थात् स्वेतरार्थाविशेषितस्वार्थबोधजनकस्वरूपयोग्यत्वाभाववान् निपाताद्य-तिरिक्तः शब्दः प्रत्ययः इत्यर्थः। तथा च शब्दशक्तिप्रकाशिकायां "यः शब्दः शब्दान्तरार्थविशेषिते यादृशस्वार्थे धर्मिणि तिङर्थस्यान्वयबोधने स्वरूपायोग्यः, स वा निभादिशब्देभ्यो भिन्नस्तादृशार्थे प्रत्ययः इत्यर्थः। 'चैत्रोऽस्ति' इत्यादौ अर्थान्तरानवच्छिन्ने स्वार्थे नाम्नां तिङर्थान्वयबोधकत्वम्। एवं 'यजेत, स्थीयते' इत्यादौ यजादिधातूनाम्। 'पचति' इत्यादौ तिङां 'पाचकोऽस्ति' इत्यादौ कृतां 'काश्यपिरस्ति' इत्यादौ च तद्धितानां प्रकृत्यर्थावच्छिन्न एव स्वार्थे कृत्यादौ तिङर्थस्य वर्त्तमानत्वादेर्बोधकत्वं न तु तदनवच्छिन्न इति तेषु नाप्रसङ्गः"[28] इति।

वाक्यपदीयकारेणापि उक्तं–

"यः शब्दः स्वेतरस्यार्थे स्वार्थस्यान्वयबोधने।
यदपेक्षस्तयोः पूर्वा प्रकृतिः प्रत्ययः परः"॥[29] इति।

पुनः प्रकृतिः द्विविधा नामधातुभेदात्। एवञ्च सुप् तिङ् चेति प्रत्ययः द्विविधः। एतेषां तु विवरणं परेषु अध्यायेषु आलोचयिष्यते।

**पदभेदविवेचनम्—**

पदस्य भेदविषये विदुषाम् अनिर्णीतः विवादः दृश्यते। कैश्चन आचार्यैः पदं द्विविधम् इति उक्तम्। अन्यैः कैश्चित् आचार्यैः चतुर्विधं पदम् इति स्वीकृतम्। अपरैश्च पञ्चधापदम् इति समाख्यातम्। एवञ्च वाक्येभ्यः अपोद्धृते पदविषये आचार्याणां मतत्रयम् अवलोक्यते। अयं मतभेदः भर्त्तृहरिणा कारिकया उपस्थापितः–

"द्विधा कैश्चिद् पदं भिन्नं चतुर्धा पञ्चधापि वा।
अपोद्धृत्यैव वाक्येभ्यः प्रकृतिप्रत्ययादिवत्"॥[30] इति।

अर्थात् यथा पदे प्रकृतिप्रत्यययोः भेदः कल्पितः, तथैव वाक्ये अपि कैश्चित् आचार्यैः पदं द्विविधं, चतुर्विधं, पञ्चविधं वेति भेदः कल्पितः। तच्च कथमिति अधः आलोच्यते–

**पदं द्विविधम्—**

कैश्चित् पदं द्विविधम् इत्युक्तम्। वाक्यपदीयं व्याचक्षाणः आचार्यः हेलाराजः वाक्यात् पदानाम् अपोद्धारं द्विविधं प्रत्यपादयत्। प्रथमं तावत्– नामरूपं पदम्, द्वितीयं तावत् आख्यातरूपं पदम्। उक्तञ्च–

"पदापोद्धारो द्विविधः नामाख्यातरूपः प्राथमकल्पिकः।
शक्तिशक्तिमतोरभेदात् कारकात्मा सिद्धरूपोंऽशः"॥[31] इति।

अनयोः एव नामाख्यातयोः अन्येषां स्वीकृतानां पदानाम् अन्तर्भावः सम्भवति। अत्र नामपदेन सुपां प्रकृतिः प्रातिपदिकं विवक्षितम्, आख्यातपदेन च क्रियाप्रधानं पदम् अभिप्रेतम् अस्ति।

**पदं चतुर्विधम्—**

तात्त्विकदृष्ट्या पदं द्विविधमेव अस्ति। तथापि अर्थगतं भेदम् अधिकृत्य व्यवहारिकदृष्ट्या केैश्चित् विद्वद्भिः पदस्य चातुर्विध्यं कल्पितमस्ति। पदचतुष्टयस्य उल्लेखः दृश्यते सर्वाद्यम् ऋक्संहितायां–

"चत्वारि वाक् परिमिता पदानि, तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति"॥[32] इति।

यास्कमते सर्वाणि अपि पदजातानि चतुर्षु पदभेदेषु प्रविभक्ताः सन्ति। तानि च पदजातानि– १.नाम, २.आख्यातम्, ३.उपसर्गः, ४.निपातश्च इति वर्तन्ते। "चत्वारि वाक् परिमिता पदानि" इति ऋचं व्याचक्षाणः यास्काचार्यः पदचतुष्टयं वैयाकरणाभिमतम् इति समसूचयत्– "नामाख्याते चोपसर्गनिपाताश्चेति"[33] इति। पाणिनीयं तन्त्रं भाषमाणः पतञ्जलिराचार्यः अपि व्याकरणाध्ययनप्रयोजनप्रतिपादनावसरे उद्धृताम् ऋचं व्याचक्षाणः पदजातानि पर्यगणयत्। ऋक्प्रातिशाख्यं भाषमाणः उवटः पदानां विभागचतुष्टयमेव स्वीकरोति।

**पदं पञ्चविधम्—**

केचन मन्यन्ते पदं पञ्चविधम्। तथा च कर्मप्रवचनीयमपि पदं भवति इति स्वीकृत्य नामाख्यातोपसर्गनिपातैः सह अस्य कर्मप्रवचनीयस्य योगेन पञ्चविधं पदम् इत्युक्तम्। आचार्यः भर्त्तृहरिः पदविषयकमतभेदनिरूपणसन्दर्भे एतत् मतम् अपि निर्दिदेश।

भगवतः पाणिनेः पदभेदविषये यत् मतमस्ति, तत् बोद्धुम् आदौ एव एतेषां पदजातानां स्वरूपं ज्ञातव्यं भवति। सम्प्रति एकैकम् आलोच्यते–

**नामाख्यातविवेचनम्—**

व्याकरणे नामाख्यातयोः महत्त्वपूर्णं स्थानम् अस्ति। वाक्यस्य प्राथमकल्पिको विभागो नामाख्यातरूपेणैव क्रियते। यास्काचार्यः नामाख्यातयोः स्वरूपमित्थं समाचष्ट–

"भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानि"[34] इति, धातोरर्थद्वयं स्वीकृतं वैयाकरणैः १.फलम्, २.व्यापारश्च। तत्र फलं प्रति व्यापारस्य प्राधान्यं भवति। तथा हि वैयाकरणभूषणसारे उक्तं–

"फलव्यापारयोः धातुराश्रये तु तिङः स्मृताः।
फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम्"॥[35] इति।

व्यापार एव अत्र भावपदेन यास्कस्य अभिप्रेतोऽस्ति। सर्वत्रैव धातुप्रयोगस्थले अर्थद्वयमेतत् सुस्पष्टं प्रतीयते। पचतीत्युक्ते दर्विसंघट्टनफूत्कारादिरूपः कर्तृनिष्ठः व्यापारः प्रतीयते, स्थाल्यां प्रस्तारितं पक्वौदनरूपं तण्डुलनिष्ठं फलमपि ज्ञायते। अत एव व्यापाराश्रयः कर्ता, फलाश्रयश्च कर्मेति व्यवह्रियते।

धातुश्च कृत्प्रत्ययेन युक्तो नाम इत्युच्यते। पाणिनिना प्रातिपदिकशब्देन[36] नामपदं व्यवहृतम्। यास्को द्रव्यं सत्त्वपदेन स्मरन् सत्त्वप्रधानार्थकं नामपदम् अभाषत। भर्त्तृहरिणा आख्यातं नाम च तात्त्विकदृष्ट्या विचारितं--

"प्राप्तक्रमा विशेषेषु क्रिया सैवाभिधीयते।
क्रमरूपस्य संहारे तत् सत्त्वमभिधीयते"॥[37] इति।

भर्त्तृहरिमते वाग्रूपा महासत्ता प्राप्तक्रमा सती क्रिया भवति। या च अस्माभिराख्यातपदेन व्यवह्रियते। प्राप्तक्रमा च इयं महासत्ता क्वचित् संहृता सती सत्त्वपदाभिधानं लभते। क्रियासामान्यमेव गतौ प्राप्तक्रमं सद् गच्छति इति उच्यते, पचौ च पचति इति उच्यते। प्राप्तक्रमं क्रियासामान्यमेव क्वचित् संहृतं सन्नामपदेन उच्यते। यथा-- गौः, पाचकः इत्यादयः। नामाख्यातयोः अयं तात्त्विकः भेदः भर्त्तृहरिणा इत्थं प्रदर्शितः--

"आख्यातशब्दैरर्थोऽसावेवंभूतोऽभिधीयते।
नामशब्दाः प्रवर्तन्ते संहरन्त इव क्रमाः"॥[38] इति।

हेलाराजो भर्त्तृहरेः इदम् एव मतम् आधारीकृत्य अकथयत् यत् क्रियावाची धातुरेव प्रत्ययविशेषयोगेन सत्त्वाभिधायी[39] समापद्यते। अत्र भाष्यकारस्यापि वक्तव्यमस्ति यत्, "कृदभिहितो भावो द्रव्यवत् भवति"[40] इति। अर्थात् यदा क्रियायाः मौलिकांशः धातुः कृत्प्रत्ययेन सह संयुक्तो भवति तदा सः नामरूपेण बोध्यः। यथा पच् + लट् + ति = पचति इति आख्यातः, परन्तु पच् + क्तिन् = पक्ति इति कृदन्तः अस्ति, अतः अस्य नामरूपेण ग्रहणं भवति।

जैमिनिना नामाख्यातयोः स्वरूपोपलब्ध्ये सुगमा पद्धतिः समाश्रिता। 'सोमेन यजेत' इत्यादीनाम् उच्चारणकाले येन शब्देन द्रव्यगुणात्मकस्य वस्तुजातस्य स्वरूपोपलब्धिः भवति, स शब्दो नामपदेन उच्यते। यथा उद्धृतवाक्ये 'सोमेन' इति पदे सोमपदं नामपदमस्ति। सोमनामकस्य वस्तुनः द्रव्यगुणात्मकरूपेण उपलब्धिः दृश्यते। यजिं प्रति साकाङ्क्षम् इदं सोम इति नामपदमस्ति। सर्वेऽपि सत्त्वाभिधायिनः वृक्षादयः शब्दाः नामपदान्येव विद्यन्ते। सोमेन यजेत इत्यादीनामुच्चारणकाले येन च शब्देन कस्यचनापि सत्त्वभूतस्य उपलब्धिर्न भवति, यस्य च स्वातन्त्र्येण प्रयोगोऽपि न भवति तत् आख्यातपदम् उच्यते। यथा सोमेन यजेत इति वाक्ये यजेत इति पदे 'त' इति आख्यातमस्ति। यजेत इति कृत्स्नमपि आख्यातपदम् अभिधीयते। नहि यजेत इति आख्यातपदोच्चारणकाले कस्यचन सत्त्वभूतस्य अर्थस्य उपलब्धिः दृश्यते। सर्वेऽपि असत्त्वभूतस्य भावनापदवाच्यस्य अर्थस्य अभिधायिनः पचत्यादयः शब्दा आख्यातपदान्येव विद्यन्ते।

ऋक्प्रातिशाख्ये एवं प्रतिपादितम् अस्ति यत् सत्त्वाभिधायकं नाम, भावाभिधायकम् एव आख्यातम्[41] इति। ऋक्संहिताभाष्ये सायणः अपि आह– क्रियाप्रधानमाख्यातम्, द्रव्यप्रधानं नाम[42]। आख्यातगता विभक्तयः आख्यातिक्य उच्यन्ते। नामगता च विभक्तयो नामिक्यो भवन्ति।

**उपसर्गविवेचनम्—**

आख्यातात् प्रागुपसृजन्त[43] इति व्युत्पत्त्या द्वाविंशतिसंख्यकाः प्रादयः सन्ति। तथा हि– प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आङ्, नि, अधि, अपि, अति, सु, उत्, अभि, प्रति, परि, उप, इति प्रादयः। प्रादयः क्रियायोगे उपसर्गपदेन पाणिनीये तन्त्रे व्यवह्रियन्ते। निरुक्ते ऋक्प्रातिशाख्ये च विंशतिरेव[44] प्रादयः। तत्र दुस्, निस् इति उपसर्गद्वयं न पठ्यते। क्रियायोगे[45] प्रादीनामुपसर्गसंज्ञा पाणिनिना व्यवहृता। उपसर्गा हि क्रियाविशेषका[46] भवन्ति। परिगणितप्राद्यतिरिक्ता अन्येऽपि शब्दाः पाणिनिना क्रियाविशेषकत्वेन समाख्याताः। परं ते प्राद्यतिरिक्ताः शब्दाः गतिसंज्ञामेव लभन्ते।

ते च प्रादयः क्रियायोगे उपसर्गसंज्ञां लभन्ते। तेषां योगात् धात्वर्थस्य परिवर्तनं स्यात्। तदुक्तं हरिणा–

"उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।
प्रहाराहारसंहारविहारपरिहारवत्"॥[47] इति।

उपसर्गः धातोः अर्थं बलात् अन्यत्र नयति। यथा– हृञ्-हरणे धातोः उपसर्गयोगात् प्रहारादयः अर्थाः। यथा वा उपचयः वृद्धिः, अपचयः क्षयः। किन्तु उपसर्गयोगे अन्यः एव अर्थः भासते इति नियमः न वर्त्तते। उपसर्गवशात् त्रिधा अर्थगतिः सम्भवति। तदुक्तं–

"धात्वर्थं बाधते कश्चित् कश्चित् तमनुवर्तते।
विशिनष्टि तमेवार्थम् उपसर्गगतिस्त्रिधा"॥[48] इति।

कदाचित् उपसर्गः धात्वर्थं बाधते। तथा चयनार्थकचिञ्धातोः उपोपसर्गयोगात् वृध्यर्थः उपचयः। कदाचित् धात्वर्थमेव अनुवर्तते। यथा सूते प्रसूते। कदाचित् तमेवार्थं विशेषयति। यथा सरति अनुसरति। अनुसृत्य सरति इति धात्वर्थं विशेषयति।

"श्रदन्तरोरुपसर्गवद्वृत्तिः"[49] इति वार्त्तिकेन श्रत् इति शब्दोऽपि क्रियायोगे उपसर्गरूपेण स्वीकर्तव्यः। यथा– श्रत्+धा+अङ्– श्रद्धा। अन्तर्-शब्दस्य अङ्विधिकर्तव्ये, किविधिकर्तव्ये, तथा णत्वे कर्तव्ये उपसर्गसंज्ञा भवति। यथा– अन्तर्+धा– अन्तर्धा इत्यत्र "आतश्चोपसर्गे" (पा. सू. ३-३-१०६) इत्यनेन अङ्-प्रत्ययः भवितुम् अर्हति, यतः अङ्विधिकर्तव्ये अन्तर्-शब्दस्य उपसर्गसंज्ञा भवति। अन्तर्+धिः– अन्तर्धिः इत्यत्र "उपसर्गे घोः किः" (पा. सू. ३-३-९२) इत्यनेन कि-प्रत्ययः भवति। अन्तर्+भू इत्यत्र लोट्-लकारस्य उत्तमपुरुषैकवचनस्य रूपसिद्धौ "आनि लोट्" (पा. सू. ८-४-१६) इत्यनेन णत्वं भवितुमर्हति, तेन अन्तर्भवाणि इति जायते।

"दुरः षत्वणत्वयोरुपसर्गत्वप्रतिषेधो वक्तव्यः"[50] इति वार्त्तिकेन षत्वे णत्वे च कर्तव्ये दुस् इत्यस्य दुर् इत्यस्य च उपसर्गसंज्ञायाः प्रतिषेधः भवति। यथा– दुर्+भू इत्यस्य लोट्-लकारस्य उत्तमपुरुषैकवचने दुर्भवानि इति भवति। अत्र दुर् इत्यस्य यदि उपसर्गसंज्ञा अभविष्यत्, तर्हि "आनि लोट्" (पा. सू. ८-४-१६) इत्यनेन नकारस्य णत्वम् अभविष्यत्। परन्तु णत्वे कर्तव्ये दुर् इत्यस्य उपसर्गसंज्ञायाः प्रतिषेधः भवति, अतः अत्र णत्वं न भवति। दुस्+स्था इत्यस्य लृट्-

लकारस्य प्रथमपुरुषैवचने दुःस्थास्यति इति भवति। अत्र दुस् इत्यस्य यदि उपसर्गसंज्ञा अभविष्यत्, तर्हि "उपसर्गात् सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेध-सिचसञ्जस्वञ्जाम्" (पा. सू. ८-३-६५) इत्यनेन स्था इत्यस्य सकारस्य षत्वम् अभविष्यत्। परन्तु षत्वे कर्तव्ये दुस् इत्यस्य उपसर्गसंज्ञायाः प्रतिषेधः भवति, अतः अत्र षत्वं न भवति।

**निपातविवेचनम्—**

निपातं लक्षयितुम् आचार्यः जगदीशः आह–

"स्वार्थे शब्दान्तरार्थस्य तादात्म्येनान्वयाक्षमः।
सुबाद्यन्यो निपातोऽसौ विविधश्चादिभेदतः"॥[51] इति।

अर्थात् यादृशार्थे शब्दान्तरार्थस्याभेदेन अन्वयबोधजननायोग्यः सुबभिन्नो निपातः। स च निपातः चादिभेदेन अनेकविधः इत्यर्थः। यः शब्दः केवलं यादृशस्वार्थे शब्दान्तरार्थस्य तादात्म्येन अन्वयबोधं प्रति असमर्थः सुबादिप्रत्ययेभ्यः प्रत्येकं भिन्नः सः तादृशार्थे निपातः। चादयो निपाताः स्वार्थे समुच्चयादौ नामाद्यर्थस्य अभेदेन अन्वयबोधं प्रति अयोग्याः।

नामाख्यातोपसर्गेभ्यः अन्ये शब्दा निपाता[52] उच्यन्ते। पाणिनिना नामतः निपाताः पठिताः। "चादयोऽसत्त्वे" (पा. सू. १-४-९७) इति सूत्रादारभ्य "अधिरीश्वरे" (पा. सू. १-४-५७) इति सूत्रात् प्राक्तनेषु सूत्रेषु पठिताः असत्त्ववाचकाश्चादयः, प्रादयः, अन्ये च शब्दाः पाणिनीये निपातसंज्ञाः[53] भवन्ति। निपातानां बहुप्रकारकेषु अर्थेषु निपतनाद् निपात इति अन्वर्था संज्ञा विधीयते। तत्र निरुक्ते उपस्थापितम्– "अथ निपाता उच्चावचेष्वर्थेषु निपतन्ति, उपमार्थेऽपि कर्मोपसंग्रहार्थेऽपि पादपूरणाः"[54] इति। पादपूरणार्था अपि निपाताः प्रयुज्यन्ते। उवटेन अनन्तभट्टेन च एकेन श्लोकेन एषां चतुर्णां नामाख्यातोपसर्गनिपातानां स्वरूपोल्लेखः क्रियते–

"क्रियावाचकमाख्यातमुपसर्गो विशेषकृत्।
सत्त्वाभिधायकं नाम निपातः पादपूरणः"॥[55] इति।

**कर्मप्रवचनीयविवेचनम्—**

सम्बन्धावच्छेदहेतवः कर्मप्रवचनीयाः[56] इति स्वीक्रियन्ते। अनु, उप, अप, परि, आङ्, प्रति, अभि, अधि, सु, अति, अपि इति प्रादिषु एकादश निपाताः कर्मप्रवचनीयसंज्ञारूपेण[57] परिगणिताः पाणिनिना। प्रयुज्यमाने क्रियापदे क्रियाविशेषस्य द्योतकाः कर्मप्रवचनीयाः भवन्ति। कर्म प्रोक्तवन्तः कर्मप्रवचनीयाः[58] इति पतञ्जलिः।

शब्दशास्त्रे क्रियाकारकपूर्वकः सम्बन्धः स्वीक्रियते। क्रिया क्वचित् सम्बन्धं जनयित्वा विनिवर्तते, क्वचित् च श्रूयमाणैव सा सम्बन्धं जनयति। यथा राजपुरुषोऽयम् इत्यत्र भरणलक्षणा क्रिया स्वस्वामिभावलक्षणम् आश्रयाश्रयिभावलक्षणं वा सम्बन्धं जनयित्वा विनिवृत्ता। अत्र हि राज्ञः पुरुषोऽयम् इति विच्छिद्यते। यतः स राजा इमं पुरुषं बिभर्ति। अतो विनिवृत्ता भरणलक्षणा

क्रिया तस्य सम्बन्धस्य जनिका वर्तते। श्रूयमाणापि क्रिया सम्बन्धस्य उपजनिका भवति। यथा मातुः स्मरतीत्यत्र क्रियापदं श्रूयमाणं सम्बन्धम् उपजनयति। अत्र श्रूयमाणया स्मरतिक्रियया निमित्तनिमित्तिभावलक्षणः सम्बन्धः जन्यते। तच्च वाक्यपदीये उक्तं–

"जनयित्वा क्रिया काचित्सम्बन्धं विनिवर्त्तते।
श्रूयमाणे क्रियाशब्दे सम्बन्धो जायते क्वचित्"॥[59] इति।

एवञ्च क्रियया उपजनिते तस्मिन् सम्बन्धे यदा क्वचित् क्रियापदं विनिवर्तते तदा प्रतिपत्तुः सन्देहो भवति, क्रियाजनितोऽयं न वेति, तदा तत्र कर्मप्रवचनीयेन तस्यां क्रियायां नियम्यते[60]। तत्र कर्मप्रवचनीयेन सम्बन्धविशेषः प्रत्याय्यते। अत एव क्रियाकृतं सम्बन्धविशेषं द्योतयन्तीति कर्मप्रवचनीया इति प्रामाणिका अभिदधते। अत एव कर्म प्रोक्तवन्तः, क्रियाकृतं विशेषसम्बन्धं द्योतयन्तीति कर्मप्रवचनीयाः उच्यन्ते। यथा– 'शाकल्यस्य संहिताम् अनु प्रावर्षद्' इत्यत्र लक्ष्यलक्षणभावं सम्बन्धं जनयित्वा निशमिक्रिया विनिवृत्ता। एवञ्च 'शाकल्यस्य संहिताम् अनुनिशम्य देवः प्रावर्षद्' इति प्रयोक्तव्ये 'शाकल्यस्य संहितामनु प्रावर्षद्' इति प्रयुक्ते विनिवृत्तया क्रियया उपजातस्य सम्बन्धस्य द्योतनार्थमनुः कर्मप्रवचनीयः प्रयुज्यते।

**पाणिनीयसूत्रैः कर्मप्रवचनीयविषयविवेचनम्—**

कर्म + प्र + वच् इत्यत्र अनीयर्-प्रत्यये भूतकाले कर्तर्यर्थे कर्मप्रवचनीय इति सिद्ध्यति। कर्म प्रोक्तवन्तः कर्मप्रवचनीयाः[61] इति भाष्यकारः। कर्मप्रवचनीयसंज्ञा अन्वर्थसंज्ञा अर्थात् अर्थानुसारिणी संज्ञा बोध्या इति तु भाष्यकाराभिमतम्। कर्मप्रवचनीय इत्यत्र कर्मपदेन क्रिया बोध्या। अतिक्रान्तक्रियागतसम्बन्धं कर्मप्रवचनीयः द्योतयति न तु वर्तमानक्रियाम्। अर्थात् एवं वक्तुं शक्यते यत्, कर्मप्रवचनीयेन सह क्रियाजनितसम्बन्धस्य प्रतीतिः भवति। स्वरूपतः निपातोपसर्गयोः तुल्यः कर्मप्रवचनीयः तथापि उपसर्गात् भिन्नः, किन्तु उपसर्गस्य इव कर्मप्रवचनीयस्यापि क्रियायाः पूर्वं प्रयोगः दृश्यते। अत्र विशेषता अस्ति यत्, सन्धिकार्यं धातूपसर्गयोः मध्ये अनिवार्यं, परन्तु कर्मप्रवचनीये षत्वणत्वादिसन्धिकार्यम् अनिवार्यं नास्ति। अतः उपसर्गाणां स्वतन्त्रप्रयोगः न सम्भवति। कर्मप्रवचनीयानां तु स्वतन्त्रप्रयोगः भवति। कर्मप्रवचनीयसंज्ञा उपसर्गसंज्ञां गतिसंज्ञां च बाधते। कर्मप्रवचनीयविषये आचार्येण भर्तृहरिणा उक्तं–

"क्रियाया द्योतको नायं सम्बन्धस्य न वाचकः।
नापि क्रियापदापेक्षी सम्बन्धस्य तु द्योतकः"॥[62] इति।

अर्थात् कर्मप्रवचनीयः 'प्रपचति' इत्यत्र उपसर्गवत् क्रियां नैव द्योतयति। पुनः सम्बन्धस्य वाचकोऽपि न भवति। अपरञ्च 'प्रादेशं विपरिलिखति' इत्यत्र वि-शब्दः यथा क्रियापदस्य आक्षेपं करोति तद्वत् कर्मप्रवचनीयः क्रियापदस्य नैव आक्षेपं करोति। अतः कर्मप्रवचनीयस्तु विशिष्टक्रियाजनितसम्बन्धस्य भेदकः अर्थात् विशेषकः अस्ति।

अष्टाध्याय्याम् अनु, उप, अप, परि, आङ्, प्रति, अभि, अधि, सु, अति, अपि इति एकादशानां कर्मप्रवचनीयानामुल्लेखः वर्तते। एते कर्मप्रवचनीयाः हेतुलक्षण-सहार्थ-हीनता-आधिक्य-वर्जन-मर्यादावचन-लक्षण-इत्थम्भूताख्यान-भाग-वीप्सा-प्रतिनिधि-प्रतिदान-आनर्थक्य-पूजाधिक्रमण-पदार्थसम्भावन-अन्ववसर्ग-गर्हा-समुच्चय-स्वाम्य-अधिकारार्थानां सम्बन्धं जनयन्ति। कर्मप्रवचनीयानां योगे द्वितीया-पञ्चमी-सप्तमीविभक्तयः भवन्ति।

**कर्मप्रवचनीययोगे द्वितीयाविभक्तिविवेचनम्—**

"अनुर्लक्षणे" (पा. सू. १-४-८४) – हेतुभूते अर्थे द्योत्ये सति अनुः कर्मप्रवचनीयसंज्ञकः भवति। अर्थात् लक्ष्यलक्षणभावसम्बन्धे द्योत्ये अनोः कर्मप्रवचनीयसंज्ञा जायते इति सूत्रार्थः। अस्य सूत्रस्य व्याख्यावसरे कौमुदीकारः आह– "गत्युपसर्गसंज्ञापवादः"[63] इति। अत्र एवं भावः अस्ति– "गतिश्च" (पा. सू. १-४-६०), "उपसर्गाः क्रियायोगे" (पा. सू. १-४-५९) इति सूत्राभ्यां प्रति, परि, अनु इत्यादीनां विधीयमानायाः गतिसंज्ञायाः उपसर्गसंज्ञायाः च अपवादत्वात् बाधिका कर्मप्रवचनीयसंज्ञेयम्। वस्तुतः कर्मप्रवचनीयेति अन्वर्थसंज्ञाबलात् संज्ञेयं न केवलं क्रियां द्योतयति अपि तु क्रियाजनितसम्बन्धविशेषं द्योतयति। एवं प्रति, परि, अनु इत्यादिषु क्रियानिरूपितसम्बन्धस्य द्योत्यभावेन अन्वयात् गतिसंज्ञायाः उपसर्गसंज्ञायाः च प्राप्तिः भवति, तयोः बाधिका इयं कर्मप्रवचनीयसंज्ञा।

"कर्मप्रवचनीययुक्ते द्वितीया" (पा. सू. २-३-८) – कर्मप्रवचनीयेन सह योगे सति द्वितीया भवति इति सूत्रार्थः। उदाहरणन्तावत् पर्जन्यो **जपम्** अनु प्रावर्षत्। जपनिमित्तकं वर्षणं कृतवान् मेघ इत्यर्थः। अत्र वर्षणस्य हेतुभूतं जपम् अनुः द्योतयति। अतः "अनुर्लक्षणे" (पा. सू. १-४-८४) इति सूत्रेण 'अनु' इत्यस्य कर्मप्रवचनीयसंज्ञा भवति। कर्मप्रवचनीयेन अनुना सह योगे जपशब्दात् "कर्मप्रवचनीययुक्ते द्वितीया" (पा. सू.२-३-८) इति सूत्रेण द्वितीया विभक्तिः विधीयते।

"तृतीयार्थे" (पा. सू. १-४-८५) – तृतीयार्थः अत्र साहित्यं, सहार्थो वा गृह्यते। साहित्ये अर्थे द्योत्ये अनुः कर्मप्रवचनीयसंज्ञकः भवति। उदाहरणन्तावत् **नदीम्** अन्ववसिता सेना। नद्या सह सम्बद्धा सेना इत्यर्थः। अत्र "तृतीयार्थे" (पा. सू. १-४-८५) इत्यनेन सूत्रेण 'अनु' इत्यस्य कर्मप्रवचनीयसंज्ञायां "कर्मप्रवचनीययुक्ते द्वितीया" (पा. सू. २-३-८) इत्यनेन अनुयोगे नदीशब्दात् द्वितीया विधीयते।

"हीने" (पा. सू. १-४-८६) – हीनः निकृष्टः इत्यर्थः। निकृष्टभावे द्योत्ये अनोः कर्मप्रवचनीयसंज्ञा भवति इति सूत्रार्थः। उदाहरणन्तावत् अनु **हरिं** सुराः। देवाः हरेः हीनाः निकृष्टाः इत्यर्थः। अत्र "हीने" (पा. सू. १-४-८६) इत्यनेन सूत्रेण 'अनु' इत्यस्य कर्मप्रवचनीयसंज्ञायां हरिशब्दात् द्वितीया विधीयते।

"उपोऽधिके च" (पा. सू. १-४-८७) – चकारेण 'हीने' इत्यस्य ग्रहणम्। हीने अधिके च अर्थे 'उप' इत्यस्य कर्मप्रवचनीयसंज्ञा भवति इति सूत्रार्थः। हीने अर्थे उदाहरणन्तावत् उप **हरिं**

सुराः। सुराः हरेः हीनाः सन्ति इत्यर्थः। अत्र हीने अर्थे द्योत्ये 'उप' इत्यस्य "उपोऽधिके च" (पा. सू. १-४-८७) इत्यनेन सूत्रेण कर्मप्रवचनीयसंज्ञायां हरिशब्दात् द्वितीया विधीयते। 'उप' इत्यस्य अधिके अर्थे द्वितीयाविभक्त्यर्थं कर्मप्रवचनीयसंज्ञाविधानं नास्ति, अपि तु "यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी" (पा. सू. २-३-९) इति सूत्रेण उपयोगे सप्तमी विधास्यते।

"लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रतिपर्यनवः" (पा. सू. १-४-९०) – ज्ञापकार्थविषयभूते, इत्थम्भूताख्यानार्थविषयभूते, भागार्थविषयभूते वीप्सार्थविषयभूते च प्रति परि अनु इत्येते कर्मप्रवचनीयसंज्ञकाः भवन्ति। एकैकम् उदाहरणमुपस्थाप्यते–

लक्षणे– **वृक्षं** प्रति परि अनु वा विद्योतते विद्युत्। वृक्षेण लक्ष्यमाणा विद्युत् विद्योतते इत्यर्थके अस्मिन् वाक्ये "लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रतिपर्यनवः" (पा. सू. १-४-९०) इत्यनेन प्रति परि अनु इत्येतेषां कर्मप्रवचनीयसंज्ञा भवति। ततः "कर्मप्रवचनीययुक्ते द्वितीया" (पा. सू. २-३-८) इत्यनेन वृक्षशब्दात् द्वितीया विधीयते। अत्र अयं भावः अस्ति यत्, उत्पन्नविनष्टया विद्युता वृक्षः अपि प्रकाशितः भवति। वृक्षप्रकाशः अपि उत्पद्य विनष्टः जातः। एवं विद्युतः अभावात् विद्युत् अनुमेया भवति। प्रकाशितेन वृक्षेण विद्युतः ज्ञानं भवति, अतः वृक्षः ज्ञापकः भवति।

इत्थम्भूताख्याने– भक्तो **विष्णुं** प्रति। विष्णुविषयकभक्तिमान् इत्यर्थे अस्मिन् वाक्ये "लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रतिपर्यनवः" (पा. सू. १-४-९०) इत्यनेन 'प्रति' इत्यस्य कर्मप्रवचनीयसंज्ञा भवति। ततः "कर्मप्रवचनीययुक्ते द्वितीया" (पा. सू. २-३-८) इत्यनेन विष्णुशब्दात् द्वितीया विधीयते। भक्तः भक्तिरूपं प्रकारविशेषं प्राप्तवान्, अतः स इत्थम्भूतः।

भागे– लक्ष्मीः **हरिं** प्रति परि अनु वा। लक्ष्मीः हरेः अंशः इत्यर्थः। अस्मिन् वाक्ये भागे अर्थे विषयभूते प्रत्यादीनां कर्मसंज्ञायां हरिशब्दात् द्वितीया विधीयते। लक्ष्मीरूपस्य भागस्य हरिणा साकं स्वस्वामिभावसम्बन्धः विद्यते।

वीप्सायाम्– **वृक्षं वृक्षं** प्रति परि अनु वा सिञ्चति। प्रत्येकं वृक्षं सिञ्चति इत्यर्थः। वीप्सार्थविषयभूते अस्मिन् वाक्ये प्रत्यादीनां कर्मप्रवचनीयसंज्ञायां वृक्षशब्दात् द्वितीया विधीयते। यद्यपि अत्र कर्मत्वादेव वृक्षशब्दात् द्वितीया भवितुम् अर्हति तथापि उपसर्गसंज्ञायाः बाधनार्थं कर्मप्रवचनीयसंज्ञा क्रियते।

"अभिरभागे" (पा. सू. १-४-९१) – भागभिन्ने लक्षणेत्थम्भूताख्यानवीप्सासु अर्थेषु द्योत्येषु अभिः कर्मप्रवचनीयसंज्ञकः भवति। यथा लक्षणे– **हरिम्** अभि वर्तते। हरेः आनुकूल्ये जयः अर्थात् हरिलक्ष्यः जयः इत्यर्थः। अत्र हरेः आनुकूल्यमेव जयस्य लक्षणम् अस्ति। अतः "अभिरभागे" (पा. सू. १-४-९१) इति सूत्रेण लक्षणे अर्थे द्योत्ये 'अभि' इत्यस्य कर्मप्रवचनीयसंज्ञायां हरिशब्दात् द्वितीया भवति। इत्थम्भूताख्याने– भक्तो **हरिम्** अभि। हरिविषयकभक्तिमान् इत्यर्थे वाक्ये "अभिरभागे" (पा. सू. १-४-९१) इति इत्थम्भूताख्याने अर्थे द्योत्ये 'अभि' इत्यस्य कर्मप्रवचनीयसंज्ञा जायते। ततः हरिशब्दात् द्वितीया विधीयते। वीप्सायां– **देवं देवम्** अभिसिञ्चति। प्रत्येकं देवं स्नपयति इत्यर्थः। अत्र वीप्सार्थे द्योत्ये 'अभि' इत्यस्य

कर्मप्रवचनीयसंज्ञायां देवशब्दात् द्वितीया भवति।

"अधिपरी अनर्थकौ" (पा. सू. १-४-९३) – अर्थरहितौ अधिपरी कर्मप्रवचनीयौ भवतः इति सूत्रार्थः। यथा– **कुतः** अध्यागच्छति, **कुतः** पर्यागच्छति। कस्मात् प्रदेशात् आगच्छति इत्यर्थके वाक्ये अनर्थकस्य 'अधि' इत्यस्य 'परि' इत्यस्य च "अधिपरी अनर्थकौ" (पा. सू. १-४-९३) इति सूत्रेण कर्मप्रवचनीयसंज्ञा भवति। परन्तु तद्योगे 'कुतः' इत्यस्मात् द्वितीया न भवति। अधुना शङ्का उदेति यत्, अधिपरीत्यनयोः योगे यदि द्वितीया विभक्तिः न स्यात्, तर्हि तयोः कर्मप्रवचनीयसंज्ञायां किं फलम्? तदोच्यते तयोः कर्मप्रवचनीयसंज्ञायां सत्याम् अधिपरीत्यनयोः प्राप्तायाः गतिसंज्ञायाः बाधो भवति। गतिसंज्ञाबाधात् "गतिर्गतौ" (पा. सू. ८-१-७०) इत्यनेन सूत्रेण 'अध्यागच्छति, पर्यागच्छति' इत्यादौ अधिपरीत्यनयोः अनुदात्तस्वरः न जायते।

"सुः पूजायाम्" (पा. सू. १-४-९४) – पूजायामर्थे द्योत्ये सुः कर्मप्रवचनीयसंज्ञकः भवति इति सूत्रार्थः। यथा– सुसिक्तम्, सुस्तुतम्। सुः प्रशंसायां वर्तते। अतः 'सु' इत्यस्य प्रंशसार्थे कर्मप्रवचनीयसंज्ञा।

"अतिरतिक्रमणे च" (पा. सू. १-४-९५) – अत्र चकारेण 'पूजायाम्' इति पदं ग्राह्यम्। पूजायाम् अतिक्रमणे च अर्थे अतिः कर्मप्रवचनीयसंज्ञकः भवति। यथा– अति **देवान्** कृष्णः। संसारसंरक्षणविषये कृष्णः देवेभ्यः अधिकः अथवा देवानां कृष्णः पूज्यः इत्यर्थः। अत्र "अतिरतिक्रमणे च" (पा. सू. १-४-९५) इत्यनेन 'अति' इत्यस्य कर्मप्रवचनीयसंज्ञायां तद्योगे देवशब्दात् द्वितीया विधीयते।

"अपिः पदार्थसम्भावनाऽन्ववसर्गगर्हासमुच्चयेषु" (पा. सू. १-४-९६) – पदार्थसम्भावनान्ववसर्गगर्हासमुच्चयेषु अर्थेषु द्योत्येषु अपिः कर्मप्रवचनीयसंज्ञकः भवति। यथा पदार्थे– सर्पिषोऽपि स्यात्। सर्पिषः बिन्दुरपि स्यात् इत्यर्थके अस्मिन् वाक्ये 'अपि' इत्यस्य कर्मप्रवचनीयसंज्ञा। सर्पिषः बिन्दुना योगो भवति, न तु कर्मप्रवचनीयसंज्ञकेन अपिना। अतः सर्पिशब्दात् कर्मप्रवचनीययुक्ते द्वितीया न सम्भवति। अत्र किञ्चित् अवधेयं यत्, बिन्दुशब्दस्य प्रयोगः नास्ति, तथापि तदर्थः प्रतीयते। इयमेव पदार्थद्योतकता अपि-शब्दस्य अस्ति। अर्थात् बिन्दुः अपि-शब्दद्योत्यः कर्ता अस्ति। सर्पिषः इत्यत्र या षष्ठी सा अपि-शब्दबलेन प्रतीयमानस्य बिन्दोः अवयवावयविभावसम्बन्धे विद्यते। अतः सर्पिषः अवयवः बिन्दुरपि स्यात् इत्यर्थः। सम्भावनायाम्– सम्भावनम् इत्युक्ते उत्कर्षं प्रकटयितुम् अत्युक्तिः। यथा– अपि स्तुयाद् विष्णुम्। यद्यपि अवाङ्मनसगोचरो विष्णुः न केनापि स्तोतुं योग्यो भवति, तथापि अवाङ्मनसगोचरं विष्णुं स्तोतुं शक्तः अयम् इति वाक्यार्थः। अत्र वाक्ये सम्भावनविषये अपि इत्यस्य अपिः पदार्थेत्यादिना कर्मप्रचनीयसंज्ञा भवति। स्तुयादित्यत्र सम्भावनेऽलमिति चेत् सिद्धाप्रयोगे इति लिङ् भवति। अन्ववसर्गे– अन्ववसर्गः इत्युक्ते यथेच्छं कार्यं कर्तुमनुमतिः। यथा– अपि स्तुहि। स्तुहि न वा स्तुहि इत्यर्थः। अत्र कामचारेऽर्थे अपि इत्यस्य अपिः पदार्थेत्यादिना कर्मप्रवचनीयसंज्ञा भवति। स्तुहि इत्यत्र प्रैषातिसर्गेत्यनेन लोट्-लकारो विधीयते। गर्हायाम्– धिग्देवदत्तम्, अपि स्तुयाद्

वृषलम्। देवपितृनिन्दकस्य वृषलस्य स्तुतिकारणात् देवदत्तं धिक् इत्यर्थः। अत्र निन्दार्थो गम्यते। अपि-शब्दद्योत्यः अत्र निन्दा अस्ति। अतः अपिः पदार्थेत्यादिना अपि शब्दस्य कर्मप्रवचनीयसंज्ञा भवति। समुच्चये– अपि सिञ्च, अपि स्तुहि। सेचनं कुरु स्तुतिमपि कुरु इत्यर्थः। अत्र अपिद्वयेन समुच्चयार्थः द्योत्यते। अतः अपिः पदार्थसम्भावनेत्यादिना अपिद्वयस्य कर्मप्रचवीयसंज्ञा भवति।

**कर्मप्रवचनीययोगे पञ्चमीविभक्तिविवेचनम्—**

"अपपरी वर्जने" (पा. सू. १-४-८८) – वर्जने अर्थे अपपरीत्येतौ कर्मप्रवचनीयसंज्ञकौ भवतः इत्यर्थः।

"आङ् मर्यादावचने" (पा. सू. १-४-८९) – मर्यादाभिविध्योः अर्थयोः यत्र आङ् दृष्टः सः कर्मप्रवचनीयसंज्ञकः स्यात् इत्यर्थः। यथा– आ **पाटलिपुत्रात्** वृष्टिः। मर्यादार्थे पाटलिपुत्रात् पूर्वं यावत् वृष्टिः इत्यर्थः। अभिविध्यर्थे पाटलिपुत्रमारभ्य वृष्टिः, पाटलिपुत्रेऽपि वृष्टिः इत्यर्थः।

"पञ्चम्यपाङ्परिभिः" (पा. सू. २-३-१०) – अप-आङ्-परिभिः कर्मप्रवचनीयैः योगे पञ्चमी विभक्तिः भवति। यथा– अप **हरेः**, परि **हरेः** संसारः। हरिं वर्जयित्वा जन्ममृत्यचक्ररूपः संसारः अस्ति इत्यर्थः। आ **मुक्तेः** संसारः। मुक्तेः प्राक् जन्ममृत्युरूपः संसारः विद्यते इत्यर्थः। आ **सकलात्** ब्रह्म। सकलम् अभिव्याप्य ब्रह्म विद्यते इत्यर्थः।

"प्रतिः प्रतिनिधिप्रतिदानयोः" (पा. सू. १-४-९२) – प्रतिनिधिप्रतिदानयोः अर्थयोः प्रतिः इति कर्मप्रवचनीयसंज्ञकः भवति इत्यर्थः। प्रतिनिधिः इत्युक्ते सदृशः।

"प्रतिनिधिप्रतिदाने च यस्मात्" (पा. सू. २-३-११) – यस्मात् यत्सम्बन्धिप्रतिनिधिप्रतिदाने भवतः, तस्मात् कर्मप्रवचनीययोगे पञ्चमी विभक्तिः भवति। यथा प्रतिनिधौ– प्रद्युम्नः **कृष्णात्** प्रति। प्रद्युम्नः युद्धादौ कृष्णस्य सदृशो गुणवान् इत्यर्थः। अत्र प्रद्युम्नः कृष्णसम्बन्धी प्रतिनिधिः अस्ति। अतः कृष्णशब्दात् कर्मप्रवचनीयसंज्ञायां "प्रतिनिधिप्रतिदाने च यस्मात्" (पा. सू. २-३-११) इति सूत्रेण पञ्चमी विभक्तिः विधीयते। प्रतिदाने– **तिलेभ्यः** प्रतियच्छति माषान्। गृहीतान् तिलान् माषविनिमयेन माषप्रतिदानेन वा प्रत्यर्पयति इत्यर्थः। अत्र तिलसम्बन्धिप्रतिदानम् अस्ति अतः तिलशब्दात् पञ्चमी विधीयते।

**कर्मप्रवचनीययोगे सप्तमीविभक्तिविवेचनम्—**

"अधिरीश्वरे" (पा. सू. १-४-९७) – ईश्वर इत्यस्य स्वस्वामिसम्बन्धोऽर्थः विवक्षितः अस्ति। अतः स्वस्वामिभावसम्बन्धे अर्थे अभिः कर्मप्रवचनीयसंज्ञकः भवति इत्यर्थः।

"यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी" (पा. सू. २-३-९) – यस्मादधिकम् इत्यर्थे कर्मप्रवचनीययुक्ते सप्तमी भवति, तथा च यस्य ईश्वरवचनं तस्मादपि स्ववाचकात् ईश्वरवाचकात् च कर्मप्रवचनीययुक्ते सप्तमी भवति इत्यर्थः। यथा अधिके– उप **परार्धे** हरेर्गुणाः। परार्धादपि

अधिकाः हरिगुणाः सन्ति इत्यर्थः। अधिके अर्थे 'उप' इत्यस्य "उपोऽधिके च" (पा. सू. १-४-८७) इति सूत्रेण कर्मप्रवचनीयसंज्ञा भवति। ततः परार्धशब्दात् "यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी" (पा. सू. २-३-९) इति सूत्रेण सप्तमी। स्ववाचके– अधि **भुवि** रामः। रामः भुवः स्वामी इत्यर्थः। भूः स्वभूता, तस्याः स्वामी रामः। एवं स्वस्वामिभावसम्बन्धे "अधिरीश्वरे" (पा. सू. १-४-९७) इति सूत्रेण 'अधि' इत्यस्य कर्मप्रवचनीयसंज्ञा भवति। ततः स्ववाचकात् भू-शब्दात् "यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी" (पा. सू. २-३-९) इत्यनेन सप्तमी। ईश्वरवाचके– अधि **रामे** भूः। रामस्य स्वभूता भूः इत्यर्थः। स्वामिवाचकः रामः। "अधिरीश्वरे" (पा. सू. १-४-९७) इति सूत्रेण 'अधि' इत्यस्य कर्मप्रवचनीयसंज्ञा भवति। ततः ईश्वरवाचकात् रामशब्दात् "यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी" (पा. सू. २-३-९) इत्यनेन सप्तमी।

"विभाषा कृञि" (पा. सू. १-४-९८) – ईश्वरे अर्थे कृञ्-धातौ परे 'अधि' इत्यस्य कर्मप्रवचनीयसंज्ञा विकल्पेन जायते इत्यर्थः। यथा– यदत्र **माम्** अधिकरिष्यति। अस्मिन् विषये यत् माम् अधिकरिष्यति तद्युक्तम् इत्यर्थः। अत्र नियोक्तुः ईश्वरत्वं प्रतीयते। अत एव "विभाषा कृञि" (पा. सू. १-४-९८) इति सूत्रेण 'अधि' इत्यस्य कर्मप्रवचनीयसंज्ञायां तद्योगे अस्मत्-शब्दात् "कर्मप्रवचनीययुक्ते द्वितीया" (पा. सू. २-३-८) इति सूत्रेण द्वितीया विधीयते।

**पदभेदविषये पण्डितानां मतम्—**

- भगवान् पाणिनिः द्विविधं पदं स्वीकरोति– सुबन्तं तिङन्तञ्च[64]।
- भाष्यकारः पतञ्जलिः पाणिनिमतं गृहीत्वापि चतुर्विधं पदं स्वीकरोति नामाख्यातोपसर्गनिपातभेदात्।
- निरुक्तकारः यास्कः चतुर्विधं पदं स्वीकरोति– "चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च"[65] इति।
- व्यक्तिविवेककारः महिमभट्टः पञ्चविधं पदं स्वीकरोति नामाख्यातोपसर्गनिपातकर्मप्रवचनीयभेदात्। तच्च उक्तमस्ति– "तत्र पदमनेकप्रकारं नामाख्यातोपसर्गनिपातकर्मप्रवचनीयभेदात्"[66] इति।
- मम्मटविश्वनाथादयः आलङ्कारिकाः त्रिविधं पदं स्वीकुर्वन्ति वाचकलाक्षणिकव्यञ्जकभेदात्। तथा हि आह– "स्याद्वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा"[67] इति।
- न्यायसिद्धान्तमुक्तावलीकारः विश्वनाथपञ्चाननभट्टः चतुर्विधं पदं स्वीकरोति– यौगिक-रूढ-योगरूढ-यौगिकरूढभेदात्। तथा हि उक्तं– "शक्तं पदं, तच्चतुर्विधम्, क्वचिद् यौगिकं, क्वचिद् रूढं, क्वचिद् योगरूढं, क्वचिद् यौगिकरूढम्[68]" इति।

व्याकरणशास्त्रस्य प्रमाणभूतः खलु आचार्यः पाणिनिः। अतः पदभेदविषये भगवतः पाणिनेः मतं किञ्चित् उपस्थाप्यते। पाणिनिराचार्यः शब्दानुशासनदृष्ट्या एव पदविभागं कुरुते। अत एव प्राक् उक्तं सर्वमपि मतम् उपेक्ष्य सुप्तिङन्तरूपम् इति द्विविधं पदं स्वीचकार। सर्वमपि पदजातम्

अस्मिन् सुबन्तं तिङन्तञ्चेति विभागद्वये पाणिनिना समायोजितम्। सुपां प्रकृतिः नामपदं, तिङां च प्रकृतिः धातुः इति उच्यते। तिङन्तं पदमेव आख्यातपदेन कथ्यते। प्रत्ययः बहुविधः इति तु सर्वैः ज्ञायते, परन्तु प्रयोगदृष्ट्या पाणिनिमते द्वौ एव प्रत्ययौ मुख्यतमौ सुप्तिङौ इति। एतयोः प्रत्यययोः प्रकृतिः अपि द्विधा इति पदद्वैविध्यम् उचितम् एव अस्ति। सुबन्ततिङन्तातिरिक्तम् अन्यत् किमपि पदं न दृश्यते प्रक्रियार्थं स्वादिषु इत्यादिविषये। सर्वविधानां पदानां सुबन्ते तिङन्ते च अन्तर्भावात् नामाख्यातरूपः द्विधापदपक्षः भाषातात्त्विकः भवति।

निपातानाम् उपसर्गाणां कर्मप्रवचनीयानां च नामाख्यातयोः समावेशोऽवलोक्यते। निपाताः नामपदगतं विशेषमर्थं द्योतयन्तः नामपदेषु अन्तर्भवन्ति। निपाताः साक्षात् सिद्धं हि अर्थम् अभिदधतु, नामार्थगतं विशेषं वा द्योतयन्तु, तथापि काकदन्तपरीक्षणेन नामनिपातयोः कश्चित् भेदः न दृश्यते। स्वरादिषु ये सत्त्वप्रधानाः शब्दाः सन्ति, ते अपि नामपदानि भवन्ति, यथा स्वर्-दिवा-सायम्-रात्रौ-प्रातरित्यादयः। ये च क्रियार्थप्रधानाः अव्ययसंज्ञकाः शब्दाः ते तु आख्यातपदेषु अन्तर्भवन्ति, यथा हिरुक्-नानादयः। केवलं तिङन्तम् एव आख्यातपदम् इति न बोध्यम्, अपि तु सर्वमपि क्रियाप्रधानं पदम् आख्यातपदम् इति बोध्यम्। उक्तञ्च– "भावप्रधानमाख्यातम्"[69] इति। भावः प्रधानं यत्र तत् भावप्रधानम्। भावः इत्युक्ते अत्र क्रिया बोध्या।

क्रियाविशेषोपजनितसम्बन्धस्य अवच्छेदहेतवः कर्मप्रवचनीयाः भवन्ति। सम्बन्धविशेषद्योतनेन क्रियाविशेषस्य प्रकाशनात् कर्मप्रवचनीयाः उपसर्गेषु समावेशिताः भवन्ति। अत एव साध्यार्थगतविशेषद्योतनेन विधेयार्थगतविशेषप्रतिपादनेन वा उपसर्गकर्मप्रवचनीयपदानि आख्यातपदानि भवन्ति। अत एव सुप्तिङन्तरूपे द्वे पदे एवावलोक्यते।

**निष्कर्षोऽर्थः—**

शब्दार्थरत्नकारस्य वक्तव्यमस्ति यदा उपसर्गनिपातयोः सुबन्तत्वं स्वीक्रियते तदा तयोः पदत्वं सिद्ध्यति। यदा च तयोः सुबन्तत्वं न स्वीक्रियते तदा अर्थबोधकः प्रयोगार्हवर्णसमुदायः पदम् एव भवति। पुनः उपसर्गनिपातयोः द्योत्यार्थबोधकतया पदत्वं सिद्ध्यति। पदं नामरूपाख्यातरूपभेदात् द्विविधं, नामाख्यातोपसर्गनिपातभेदात् चतुर्विधं, नामाख्यातोपसर्गनिपातकर्मप्रवचनीयभेदात् पञ्चविधं वा इति वैमत्येऽपि सुबन्ततिङन्ताख्यं द्विविधं पदमवशिष्यते। यतो हि सुबन्ततिङन्ताख्ये पदे सर्वेषामपि पदानां समावेशः दृश्यते इति निष्कर्षोऽर्थः समायाति।

**निपातोपसर्गाः द्योतकाः वाचकाः वेति विवेचनम्—**

"उच्चावचेषु अर्थेषु निपतन्ति[70]" इति निपाताः । "चादयोऽसत्त्वे" (पा. सु. १-४-५७) इति सूत्रात् एव ज्ञायते द्रव्यभिन्नार्थे चादयः निपातसंज्ञाः भवेयुः। यथा– च, वा, वै, स्वधा, न, नञ्

इत्यादयः। निपाताः उपमार्थे, कर्मोपसंग्रहार्थे पदपूरणार्थे च प्रयुक्ताः भवन्ति। उक्तञ्च यास्काचार्येण– "अप्युपमार्थेऽपि कर्मोपसंग्रहार्थेऽपि पदपूरणाः"[71] इति। यथा– उपमार्थे– न, इव, चित्, नु प्रभृतयः। कर्मोपसंग्रहार्थे– चित्, नु प्रभृतयः। पदपूरणार्थे– इम, उ, कम् प्रभृतयः।

"प्रादयः" (पा. सू. १-४-५८) "उपसर्गाः क्रियायोगे" (पा. सू. १-४-५९) इति सूत्राभ्याम् उपसर्गस्य स्वरूपं ज्ञातुं शक्यते। प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आङ्, नि, अधि, अपि, अति, सु, उत्, अभि, प्रति, परि, उप इति प्रादयः निपाताः यदा क्रियया प्रयुक्ताः भवन्ति, तदा ते उपसर्गसंज्ञाः भवेयुः। वैदिके तु उपसर्गाणां प्रयोगे किञ्चित् वैचित्र्यं "छन्दसि परेऽपि" (पा. सू. १-४-८१) "व्यवहिताश्च" (पा. सू. १-४-८२) इति सूत्राभ्यां दृश्यते। सूत्राभ्यामुच्यन्ते गत्युपसर्गसंज्ञकाः छन्दसि परे व्यवहिता अपि प्रयोक्तव्याः। यथा– हरिभ्यां याह्योक आ। आ मन्द्रैरिन्द्र हरिभिर्याहि।

एवं निपातोपसर्गाणां ज्ञाने सत्यपि वैदिककालादेव वितर्कः विद्यते निपातोपसर्गाः द्योतकाः आहोस्वित् वाचकाः। शाकटायनाचार्यमते नामाख्याताभ्यां पृथक् प्रयुक्ताः उपसर्गाः निश्चितरूपेण अर्थं नैव प्रकाशयन्ति। उपसर्गास्तु नामाख्यातयोः अर्थानां द्योतकाः, न तु वाचकाः। तथा चोक्तं निरुक्ते– "न निर्बद्धा उपसर्गा अर्थान्निराहुरिति शाकटायनः, नामाख्यातयोस्तु कर्मोपसंयोगद्योतकाः भवन्ति"[72] । परन्तु आचार्यः गार्ग्यः उपसर्गाणां वाचकत्वं स्वीकरोति। उक्तञ्च निरुक्ते– "उच्चावचा पदार्था भवन्तीति गार्ग्यः"[73] ।

नैयायिकानां मते प्रादयः (उपसर्गाः) द्योतकाः किञ्च चादयः (निपाताः) वाचकाः भवन्ति। "यत्तु तार्किकाः उपसर्गाणां द्योतकत्वं तदितरनिपातानां वाचकत्वम्, 'साक्षात्प्रत्यक्षतुल्ययोः' इति कोशात्"[74] इति परमलघुमञ्जूषायाम्। परन्तु एवं वैषम्ये किमपि मानं नास्ति, अतः नैयायिकानामेतन्मतं न समीचीनम्। भट्टोजिदीक्षितः निपातानां द्योतकत्वं स्वीकरोति। तथा आह–

"द्योतकाः प्रादयो येन निपाताश्चादयस्तथा।
उपास्येते हरिहरौ लकारो दृश्यते यथा"॥[75] इति।

अर्थात् येन कारणेन प्रादयः उपसर्गाः द्योतकाः भवन्ति, तेनैव कारणेन चादयः निपाताः अपि द्योतकाः भवेयुः। तच्च उदाहरणेन स्पष्टीक्रियते– 'ईश्वरम् अनुभवति' इत्यस्मिन् वाक्ये–

- यः अनुभवः अर्थः ज्ञायते, सोऽर्थः धातोः नास्ति। यदि धातोः अर्थः स्यात् तर्हि 'भवति' इत्यत्रापि भू-धातुः अस्ति, तेनापि सोऽर्थः ज्ञायते।
- अनुभवः इति उपसर्गस्यापि अर्थः नास्ति। यदि उपसर्गस्य अर्थः स्यात् तर्हि प्रकृतेः अर्थः नैव तिष्ठेत्, तेन आख्यातार्थस्य सम्बन्धः न सम्भवति। नियमोऽस्ति– प्रत्ययः प्रकृतेः अर्थेन सह सम्बद्ध्य स्वार्थं प्रकाशयति। पुनः 'अनुगच्छति' इत्यत्रापि "अनु" इत्यनेन अनुभवार्थः प्रतीतः स्यात्।
- अनुभवः अर्थः धातूपसर्गयोः अपि नास्ति। धातूपसर्गयोः अर्थः चेत् गौरवं स्यात्।

अतः सत्तादेः अर्थस्य यः वाचकः धातुः अस्ति, तस्य एव अनुभवेऽर्थे लक्षणा भवति, किञ्च उपसर्गः तात्पर्यग्राहकः। तात्पर्यग्राहकत्वम् एव द्योतकत्वम्। एवं रूपेण चादिषु अपि बोध्यम्। तच्च उदाहरणेन स्पष्टीक्रियते– 'चैत्रमिव पश्यति' इत्यस्मिन् वाक्ये चैत्रपदस्य लक्ष्यार्थः सादृश्यविशिष्टः। अत्र 'इव' शब्दः तात्पर्यग्राहकः भवति। उपसर्गस्य द्योतकत्वसिद्धये दीक्षितेन युक्तिः प्रदर्शिता– 'उपास्येते हरिहरौ' इत्यत्रापि केचन प्रश्नाः समागताः–

- उपासनार्थः उपसर्गस्य भवति?
- अथवा, धातूपसर्गयोः भवति?
- अथवा, धातोः भवति?

उपासनार्थः उपसर्गस्य नास्ति। उपासनार्थः उपसर्गस्य चेत् स्वार्थफलव्यधिकरणव्यापारवाचकत्वरूपत्वं सकर्मकत्वम् इति सकर्मकस्य लक्षणं आस्-धातौ न सङ्गच्छते। यतो हि उपासनार्थस्तु उपसर्गस्य अस्ति इति स्वीकृतः तर्हि तदुपासनरूपफलम् आस् -धातोः अर्थः न स्यात् इति आस्-धातोः उपासनरूपफलवाचकत्वाभावः विद्यते।

उपासनार्थः धातूपसर्गयोः अपि नास्ति, यतो हि वाचकतायाः गौरवं स्यात्। धातोः वाचकत्वस्वीकृते द्योतकत्वम् उपसर्गे आगच्छति। तेन उप इति तात्पर्यग्राहकः भवति। सम्प्रति प्रश्नः समायाति– एतावता पर्यन्तम् उपसर्गस्य तात्पर्यग्राहकत्वमेव दृश्यते, न तु द्योतकत्वम्। तदा श्रीहरिवल्लभाचार्येण दर्पणटीकायामुच्यते– "तात्पर्यग्राहकत्वमेव इत्येवकारेण द्योतकत्वस्य वृत्त्यन्तरत्वव्यवच्छेदः। अनुभवादिफले धातोस्तात्पर्य-ग्राहकत्वस्य उपसर्गसमभिव्याहाराधीनत्वात् "उपसर्गाः क्रियायोगे" (पा. सू. १-४-५९) इत्यत्रापि क्रियाविशेषणीभूतार्थतात्पर्यग्राहकत्वमेव 'उपसर्गाः क्रियायोगे' इत्यनेन विवक्षितम्"[76] इति।

**निपातानां वाचकत्वे दोषविवेचनम्—**

नैयायिकानां मतम् आश्रित्य निपातानां वाचकत्वं स्वीक्रियते चेत् केचन दोषाः दृश्यन्ते। प्रथमतः, षष्ठ्यादिसम्बन्धवाचकविभक्तिं विना प्रातिपदिकार्थयोः भेदसम्बन्धेन अन्वयः नैव सम्भवति। न चेत्, 'राजा पुरुषः' इत्यस्य "राजसम्बन्धी पुरुषः" इति अर्थापत्तिः स्यात्। द्वितीयतः, 'धवखदिरयोः समुच्चयः' इतिवत् 'धवस्य च खदिरस्य च' इत्येव वाक्यं स्यात्, न तु 'धवश्च खदिरश्च'। तृतीयतः, काव्यादौ अन्वयः न स्यात्। तथा हि उक्तं–

"शरैरुस्रैरिवोदीच्यानुद्धरिष्यन् रसानिव।
इत्यादावन्वयो न स्यात् सुपाञ्च श्रवणं ततः"॥[77] इति।

उस्रसदृशबाणेन रससदृशोत्तरवासिनाम् उद्धरिष्यन् इत्यत्र उस्रशब्दस्य करणे तृतीया विभक्तिः अस्ति। अत्र उस्रः करणं नास्ति, अपि तु उस्रसदृशः करणम् अस्ति। यदि निपातानां वाचकत्वं स्वीक्रियते तर्हि उस्रशब्दस्य उस्रसदृशः अर्थः न भवति, परन्तु 'इव' इत्यस्य सदृशः अर्थः भवत्येव। तेन 'उस्र' इत्यत्र करणे तृतीया विभक्तिः न अनुसर्तव्या, एवञ्च 'इव' इत्यत्र

तृतीया विभक्तिः करणीया एव, परन्तु एवं नास्ति अतः निपातानां वाचकत्वं नास्ति, अपि तु द्योतकत्वम् अस्ति।

**निपातानां द्योतकत्वे युक्तिविवेचनम्—**

नैयायिकाः कथयन्ति– 'अब्राह्मणः' इत्यत्र नञ्तत्पुरुषसमासे पूर्वपदम् 'अ' इति निपातः, वैयाकरणानां मते तु सः अनर्थकः। केवलं ब्राह्मणस्य ब्राह्मणसदृशभिन्नः अर्थः भवति। पूर्वपदस्य अनर्थकत्वे उत्तरपदार्थस्य अप्राधान्यात् तत्पुरुषलक्षणाव्याप्तिः, उपसर्गस्य अर्थवत्त्वाभावात् प्रातिपदिकत्वाभावात् विभक्तिः अपि न भवेत्। तदुत्तरे दीक्षितपादः आह–

"नञ्समासे चापरस्य द्योत्यं प्रत्येव मुख्यता।
द्योत्यमेवार्थमादाय जायन्ते नामतः सुपः"॥[78] इति।

अर्थात् नञ्समासे या उत्तरपदार्थप्रधानता सा द्योत्यम् अर्थम् आश्रित्य एव भवति। तम् एव अर्थम् आश्रित्य निपाताः अर्थवन्तः भवन्ति। तस्मात् प्रातिपदिकत्वात् सुबुत्पत्तिः अपि भवति। निपातानां प्रातिपदिकत्वे मानमुच्यते–

निपातेषु सुबुत्पत्तौ "अव्ययादाप्सुपः" (पा. सू. २-४-८२) इति सूत्रमेव प्रमाणम्। यदि अव्ययात् सुबुत्पत्तिः न स्यात् तर्हि इदं सूत्रं व्यर्थं स्यात्, अतः अव्ययात् सुबुत्पत्तिः भवत्येव।

"निपातस्यानर्थकस्य" इति वार्त्तिकेन निपातानां प्रातिपदिकसंज्ञा भवति।

"कृत्तद्धितसमासाश्च" (पा. सू. १-२-४५) इति सूत्रस्थेन चकारेण अनर्थकानां प्रातिपदिकसंज्ञा भवति।

अनेन स्पष्टीक्रियते यत्, निपाताः द्योतकाः भवन्ति। आकृत्यधिकरणवार्त्तिके मीमांसाचार्यैः उक्तं–

"तयोरर्थाभिधाने हि व्यापारो नैव विद्यते।
यदर्थद्योतकौ तौ तु वाचकः स विचार्यते"॥[79] इति।

अर्थात् निपातोपसर्गयोः शक्तिलक्षणान्यतररूपः व्यापारः नास्ति। तयोः अर्थनिर्णयः न क्रियते, यतो हि एतत् द्वयं वाचकं नास्ति, अपि तु अपरस्य अर्थस्य द्योतकम् अस्ति। नामाख्यातात्मकः यः वाचकः स विचार्यते इति।

नैयायिकाः पुनः आहुः अन्वयव्यतिरेकाभ्यां निपातानां तत्तदर्थवाचकत्वम् उचितमेव। यतो हि बोधकतारूपा शक्तिः निपातेषु अस्ति। तत्र कोऽपि बाधकः नास्ति। अपरञ्च 'प्रजयति' इत्यत्र प्रकर्षरूपः अर्थः धातोः भवति। 'प्र' इति द्योतकमात्रम्, एवं रीत्या 'पचति' इत्यत्रापि कर्तृविशिष्टभावनायां धातोः लक्षणा भवति, किञ्च 'ति' केवलं तात्पर्यग्राहकम्। एवं सति वैयाकरणाः वदन्ति– अन्वयव्यतिरेकसम्बन्धेन निपातस्य वाचकत्वम् उचितम् अनुचितं वा इति विषये अस्माभिः किमपि नोच्यते, परन्तु प्रादयः द्योतकाः चादयः वाचकाः इति भेदः नोचितः।

**निपातोपसर्गाणां द्योतकत्वे वाचकत्वे च भर्त्तृहरिमतविवेचनम्—**

'पचति' इत्यादौ सम्भाविनः प्रकृष्टपाकेत्यादयः भेदाः केवलैः पचतीत्यादिभिः अनिदर्शिताः। अतः प्रपरादिना उपसर्गेण सम्बन्धे सति स्पष्टरूपः अर्थः बोध्यते। तस्मात् उपसर्गाणां द्योतकत्वम् अस्ति एव। पुनः उच्यते उपसर्गाः न केवलं द्योतकाः भविष्यन्ति यावत्पर्यन्तं ते वाचकाः अपि न स्युः। तदाह–

"अप्रयोगेऽधिपर्योश्च यावत् दृष्टं क्रियान्तरम्।
तस्याभिधायको धातुः, सह ताभ्यामनर्थकः"॥[80] इति।

अत्र एवमाशयः अस्ति यत्, 'अध्यागच्छति' इत्यत्र 'आगच्छति' इत्यनेन यः अर्थबोधः जायते, 'अध्यागच्छति' इत्यनेनापि स एव अर्थबोधः जायते, अतः अत्र 'अधि' इत्यस्य अनर्थकत्वमस्ति। तथैव 'पर्यागच्छति' इत्यत्र 'आगच्छति' इत्यनेन यः अर्थबोधः जायते, स एवार्थबोधः 'पर्यागच्छति' इत्यनेनापि जायते। अत एव अत्रापि परि इत्यस्य अनर्थकत्वं विद्यते। प्रकरणादिना 'आगच्छति' इत्यनेन सर्वतोभावविशिष्टागमनम् इत्यर्थबोधः जायते। एवं प्रयोगे अलाघवात् अधिपरीत्यनयोः प्रयोगात् गौरवजन्यदोषः भवति। लौकिकशब्दव्यवहारे लाघवं प्रति अनादरात् अधिपरीत्यनयोः प्रयोगः स्पष्टार्थः।

'अध्यागच्छति', 'पर्यागच्छति' इत्यादौ समुदायः एव विशिष्टार्थस्य वाचकः। केवलम् अधिपरीत्यनयोः किञ्च केवलं धातोः अनर्थकत्वम् अस्ति। अर्थं प्रकाशयितुं केवलं धातोः उपसर्गस्य वा सामर्थ्यं नास्ति। अपि तु द्वयोः समावेशे अर्थविशेषः प्रकाशितो भवति। अतः एवं वक्तुं शक्यते यत् धात्वर्थकथने उपसर्गास्तु सहकारिणः स्युः। अतः उपसर्गाः धातोः अर्थम् अनुवर्त्तयन्ति। तस्मादेवं स्पष्टीक्रियते यत्, उपसर्गाणां वाचकत्वमपि अस्ति।

उपसर्गाणामिव निपाताः अपि अनियताः। यतो हि केचन निपाताः वाचकाः, केचन च निपाताः द्योतकाः भवन्ति। निपातानां स्वरूपं वक्तुं भर्त्तृहरिः आह–

"निपाताः द्योतकाः केचित् पृथगर्थाभिधायिनः।
आगमा इव केऽपि स्युः सम्भूयाऽर्थस्य वाचकाः"॥[81] इति।

अर्थात् निपाताः केषाञ्चित् अर्थानां द्योतकाः भवन्ति, यथा– 'वृक्षश्च प्लक्षश्च' इत्यादौ च इति निपातः समुच्चयरूपम् अर्थं द्योतयति। पुनः केचन निपाताः अर्थानां वाचकाः भवन्ति। ते तु पृथगर्थाभिधायिनः, यथा– शश्वत्, युगपत्, एकपदे इत्यादयः। पुनश्च केचन निपाताः आगमाः इव सम्भूतार्थानां वाचकाः भवन्ति, एवं निपातविषये पक्षत्रयमस्ति।

**निष्कर्षोऽर्थः—**

नागेशमते उपसर्गाणां निपातानाञ्च द्योतकत्वं विद्यते। नैयायिकाः तु निपातानां वाचकत्वं किञ्च उपसर्गाणां द्योतकत्वं स्वीकुर्वन्ति। कौण्डभट्टमते निपातानां वाचकत्वम् अस्ति। भट्टोजिदीक्षितोऽपि निपातानां द्योतकत्वं स्वीकरोति। मीमांसकाः निपातोपसर्गयोः द्योतकत्वमेव

स्वीकुर्वन्ति न तु वाचकत्वम्। भर्त्तृहरिमते उपसर्गाश्च द्योतकाः वाचकाश्च भवन्ति। केचित् निपाताः द्योतकाः, केचित्तु पृथगर्थाभिधायिनः वाचकाः। पुनः केचित् आगमा इव सम्भूयार्थानां वाचकाः भवन्ति। वैयाकरणानां मतमस्ति यत्, नैयायिकोक्तमते प्रादयः उपसर्गाः द्योतकाः किञ्च चादयः निपाताः वाचकाः इति भेदः नैव कर्तव्यः। अतः सर्वेषां निपातोपसर्गाणां द्योतकत्वम् अस्ति। एवं निपातोपसर्गाणां वाचकत्वद्योतकत्वविषये वैमत्यं वर्त्तते। अतः अत्र कः पक्षः ग्राह्यः इति विषये विद्वांसः विचारकाः।

## तथ्यसूत्रम्

1. शब्दार्थरत्नम् (वाक्यकाण्डम्)– पृ. सं.– ६।
2. शब्दार्थरत्नम् (वाक्यकाण्डम्)– पृ. सं.– १४।
3. शब्दार्थरत्नम् (पदकाण्डम्)– पृ. सं.– ४६।
4. माहेश्वरसूत्रम् १।
5. महाभाष्यम् (द्वितीयाह्निकम्)
6. वाक्यपदीयम् (१/ ७१)।
7. वाक्यपदीयम् (१/७२)।
8. वाक्यपदीयम् (ब्रह्मकाण्डम्)– पृ. सं.– ८३।
9. पाणिनीयशिक्षा ३।
10. पाणिनीयशिक्षा ४।
11. वैयाकरणसिद्धान्तकौमुदी (पा. सू. ८-२-१)।
12. पा. सू. १-१-३०।
13. वैयाकरणसिद्धान्तकौमुदी (बा. टी.)– पृ. सं.– १९।
14. वैयाकरणसिद्धान्तकौमुदी (सं. प्र.)– पृ. सं.– १९।
15. वैयाकरणसिद्धान्तकौमुदी (सं. प्र.)– पृ. सं.– २१।
16. वाक्यपदीयम् (१/१२३)।
17. शब्दार्थरत्नम् (पदकाण्डम्)– पृ. सं.– ४६।
18. शब्दार्थरत्नम् (पदकाण्डम्)– पृ. सं.– ४६ ।
19. भाषापरिच्छेदः (शब्दखण्डः)– पृ. स.– ४४१।
20. वैयाकरणभूषणसारः (सु. टी.) पृ. सं.– ३६४।
21. वैयाकरणभूषणसारः (स्फो. नि.) पृ. सं.– ३८०।
22. द्योतिका वाचिका वा स्युर्द्वित्वादीनां विभक्तयः।
    स्याद्वा संख्यावतोऽर्थस्य समुदायोऽभिधायकः॥ वा. प. (२/१६४)
23. शब्दार्थरत्नम् (प. का.)– पृ. सं.– ५०।

24. शब्दशक्तिप्रकाशिका (श्लो. सं.– ७)।
25. शब्दशक्तिप्रकाशिका (पृ. सं.– ३३)।
26. शब्दार्थरत्नम् (पदकाण्डम्)– पृ. सं.– ५१।
27. शब्दशक्तिप्रकाशिका (श्लो. सं.– १०)।
28. शब्दशक्तिप्रकाशिका (पृ. सं.– ५१)।
29. शब्दार्थरत्नम् (पदकाण्डम्)– पृ. सं.– ५०।
30. वाक्यपदीयम् (३/१/१)।
31. वाक्यपदीयम् (हेला.) ३/१/१।
32. ऋग्वेदः १/१६४/४५।
33. निरुक्तम् (१/४/१)।
34. निरुक्तम् १/१/१।
35. वैयाकरणभूषणसारः (धा. प्र.)– श्लो. सं.– २ ।
36. कृत्तद्धितसमासाश्च (पा. सू. १-२-४६)।
37. वाक्यपदीयम् ३/१/३५।
38. वाक्यपदीयम् ३/८/२९।
39. क्रियावाची धातुः सत्त्ववाचितामेति। वा. प. (हेला.) ३/१/३५।
40. सार्वधातुके यक् (पा.सू. ३-१-६७) इति सूत्रे भाष्ये।
41. तदाख्यातं येन भावं स धातुः। ऋ. प्रा. १२/१९, तन्नाम येनाभिदधाति सत्त्वम्। ऋ. प्रा. १२/१८।
42. ऋक्संहिता १/१६४, ४५।
43. प्रागुपसृज्यत आख्यातपदस्येत्युपसर्गः प्रादिः (ऋ. सं. १/१६४, ४५), सा.भा.।
44. उपसर्गा विंशतिरर्थवाचकाः (ऋ. प्रा. १२/२०)
45. उपसर्गाः क्रियायोगे (पा. सू. १-४-५९)
46. क्रियाविशेषक उपसर्गः (पा. सू. १-३-१) म. भा.।
47. वाक्यपदीये नावलोक्यते। वै. सि. कौ. (भ्वा. प्र.)– पृ. सं.– ५४।
48. काव्यालङ्कारः (द्वितीयः अध्यायः)– पृ. सं.– १०।
49. वार्तिकम् ११३१-११४७।
50. वैयाकरणसिद्धान्तकौमुदी (भ्वा. प्र.)– पृ. सं.– ५२।
51. शब्दशक्तिप्रकाशिका (श्लो. सं.– ११)।
52. इतरे निपाताः (ऋ. प्रा. १२/२१)
53. प्राग्रीश्वरान्निपाताः (पा. सू. १-४-५६)।
54. निरुक्तम् (१/२/१)।

55. उवटभाष्ये अनन्तभट्टभाष्ये च (वा. प्रा. ८/४९)।
56. सम्बन्धावच्छेदहेतवः कर्मप्रवचनीयाः इष्यन्ते। वा. प. (पुण्य.) २/१९९।
57. कर्मप्रवचनीयाः (पा. सू. १-४-८३)।
58. महाभाष्यम् (पा. सू. १-४-८३)।
59. वाक्यपदीयम् (२/१९७)।
60. स चोपजातः सम्बन्धो विनिवृत्ते क्रियापदे। कर्मप्रवचनीयेन तत्र तत्र नियम्यते।। वा. प. (२/१९९)।
61. कर्मप्रवचनीयाः (पा. सू. १-४-८३)।
62. वाक्यपदीयम् (२/२०४)।
63. वैयाकरणसिद्धान्तकौमुदी (का. प्र.)– पृ. सं.– ६२४।
64. सुप्तिङन्तं पदम् (पा. सू. १-४-१४ )।
65. निरुक्तम् (१/१।
66. व्यक्तिविवेकः (प्रथमः विमर्शः)– पृ. सं.– २२।
67. काव्यप्रकाशः (द्वितीयोल्लासः)– पृ. सं.– ८।
68. भाषापरिच्छेदः (शब्दखण्डः)– पृ. स.– ४४१।
69. निरुक्तम् (१/१)।
70. निरुक्तम् (१/२)।
71. निरुक्तम् (१/२)।
72. निरुक्तम् (१/१)।
73. निरुक्तम् (१/१)।
74. परमलघुमञ्जूषा (पृ. सं.– १४५)।
75. वैयाकरणभूषणसारः (श्लो. सं.– ४२)।
76. वैयाकरणभूषणसारः (दर्पणटीका)– पृ. सं.– ३०१।
77. वैयाकरणभूषणसारः (श्लो. सं.– ४५)।
78. वैयाकरणभूषणसारः (श्लो. सं.– ४६)।
79. वैयाकरणभूषणसारः (निपातनिर्णयः)– पृ. सं.– ३०८।
80. वाक्यपदीयम् (२/१९०)।
81. वाक्यपदीयम् (२/ १९२)।

# Bibliography


- Bhartṛhari. *Vākyapadīya*. Ed. Harinarayan Tiwari. 1st Edition. 5 vols. Varanasi: Chowkhamba Sanskrit Series Office, 2015. Sanskrit.
- Bhaṭṭācārya, Jagadīśatarkālaṅkāra. *Śabdaśaktiprakāśikā*. Ed. Dhundhiraj Sastri. Varanasi: Chowkhamba Sanskrit Sansthan, 2002. Sanskrit.
- Bhaṭṭojidīkṣita. *Vaiyākaraṇasiddhāntakaumudī*. Ed. Giridhara Sharma & Parameshwarananda Sharma. 4 vols. Delhi: Motilal Banarasidas, 2010. Sanskrit.
- Kauṇḍabhaṭṭa. *Vaiyākaraṇabhūṣaṇasāra*. Ed. Madhusudan Penna. Delhi: Bharatiya Book Corporation, 2013. Sanskrit.
- Nāgeśabhaṭṭa. Paramalaghumañjūṣā. Ed. Lokamani Dahal. Reprint. Varanasi: Chowkhamba Surabharati Prakashan, 2011. Sanskrit.
- Patañjali. *Vyākaraṇamahābhāṣya*. Ed. Jaishankar Lal Tripathi. Varanasi: Chowkhamba Krishnadas Academy, 2017. Sanskrit & Hindi.
- Yāska. *Nirukta*. Ed. Uma Shankar Sharma. Varanasi: Chowkhamba Vidya Bhawan, 1961. Hindi.